यांगौरवेणप्रत्यक्षसिद्धसर्वजातीयघटसंख्यानानुगव्यकजातिविशेषावच्छिन्नसंस्थानस्यघटपटशक्यतावच्छेदकत्वेनतत्त
ज्जातीनांघटत्वानात्मकतयाश्रद्धमतस्यासम्यक्त्वात् वस्तुतस्तुघटनिष्ठजातीनांप्रमाणांतरश्रुत्यत्वेपिदंडादीनांघटहेतुत्व
मेवाप्रामाणिकंकुतस्तज्जन्यतावच्छेदकतयाद्रव्यगतजातिसिद्धिः नचैवंघटार्थिनोदंडांगोचरप्रवृत्त्यनुपपत्तिः अवयवक्रि
याविशेषद्वाराघटजनकविलक्षणसंयोगंप्रतिदंडादीनांहेतुतयैवदंडादौघटार्थिप्रवृत्तेरुपपत्तेः दृष्टफलगोचरप्रवृत्तौफल
गोचरप्रवृत्तौप्रयोजकज्ञानसहकृताप्रयोज्यफलगोचरेच्छासाक्षादेवहेतुरंतरालिकफलसाधनताज्ञानसहकृतनतत्फलेच्छा
द्वारेत्यन्यदेतत्एकदेशिनांसंकीर्णप्रामाणिकजातिमभ्युपगच्छतांमतमाहपरेत्विति विरुद्धसंस्थानव्यंग्यानांतुरगत्वावि

BHAU DAJI MEMORIAL

हंगत्वादीनांविरुद्धसामग्रीप्रयोज्यानांनीलत्वपीतत्वादीनांसंकरोनेष्यतेअत्रयथासंख्यंहेतुद्वयमाहव्यंजकसामग्रीसंकरासंभ
वेनेतिव्यंजकयोःसामग्र्योश्चसंकरासंभवेनेसर्थः व्यंजकासंकरेप्रमाणाभावेनजातिद्वयसामानाधिकरण्यासिद्ध्याप्रयोजकसाम
ग्रीविरोधस्यचप्रयोज्यैकाधिकरण्यबाधकत्वात्संकरासंभवइत्यवधेयं प्रमाणेससपीतिसंकरस्यप्रमाणसिद्धत्वेससपीत्यर्थः प
रासांजातीनांसंकरोनेष्यतेइत्यनुषज्यतेउक्तनियमानांईदृशप्रमाणेनबाधादितिभावः अतएवप्रमाणेसतिसंकीर्णजातरूप
गमारेवअनुद्भूतरूपानुपगमेचास्पर्शस्यस्पर्शनेप्रतिरूपत्वस्पर्शनेप्रत्यक्षाभावेहेतुतयानोद्भूतत्वंप्रयोजकमतउक्तंअनुद्भूतरू
पवारिनामितिशुक्लपीतेतिशुक्लपीतादिरूपसाधारणमुद्भूतत्वंचास्पर्शत्वेशीतोष्णादिस्पर्शसाधारणमुद्भूतत्वंस्पर्शनत्वेप्रयोज्यप्र
योजकमितिसर्थः ननुरूपस्पर्शसाधारणमेकमेवोद्भूतत्वमस्तुप्रत्यक्षतायांप्रयोजकमितिसर्थः तथासत्युद्भूतरूपसत्त्वेनप्रभाया
स्पार्शनापत्तेः नचप्रभायारूपमेवप्रत्यक्षंनतुप्रभेतितद्रूपेमस्तुप्रत्यक्षतायाप्रयोजकमुद्भूतत्वंनैय्यायिकैर्नोपेयमितिवाच्यं
प्रभायाअचाक्षुषत्वेतद्भूतसंयोगविभागाचलनादीनामचाक्षुषत्वप्रसंगेनतन्मतस्यानिनुष्टत्वात् अथैवंप्रत्यक्षेमहत्त्व

हेतुतानस्यात्परमाणुरूपादावुद्भूतत्वस्यसंकीर्णजातिमंगीकुर्वतामनभ्युपगमसंभवेनपरमाण्वादिप्रत्यक्षापत्तेरयोगात्
नचावयविनउद्भूतरूपादेरवयवोद्भूतरूपादिहेतुताअन्यथोद्भूतरूपाद्युत्पत्तिनियमासंभवात्स्थूलद्रव्येषुउद्भूतरू
पाद्युत्पत्तयेतदारंभकपरमाण्वादावुद्भूतरूपाद्यभ्युपगमआवश्यकइतिवाच्यं उद्भूतरूपवद्द्व्यद्वारंभकैरेवाणुभिरनु
द्भूतरूपवत्भर्जनकपालस्थवन्द्वाद्वारंभोदयादवयवोद्भूतरूपस्यावयविनितदुत्पादनियामकत्वासंभवादन्यथैवतन्नि
यामकत्वायाआवश्यकत्वात् तत्रविभिन्नपरमाणुकल्पनेगौरवात् अस्तुवाप्रत्यक्षत्वप्रयोजकादन्यएवतैर्व्यापकःप
रमाणुरूपसाधारणोभवःतत्प्रयोजकइतिचेत्परमाणुद्व्यणुकानभ्युपगंतॄणामिवतदुपगमेपिमहत्त्वकारणतानाभ्युपगंत
व्यैव वस्तुजातिसंकरस्यादोषत्वेरूपनिष्ठोद्भवोमहत्त्वनिष्ठोवाचाक्षुषत्वप्रयोजकतयाकल्प्यतइत्यत्रविगमनाविरहान्म
हत्त्वस्यापितत्कारणतादुर्वारैव जातिसंकरस्यदोषत्वेपिएकत्वोद्भवएवप्रत्यक्षताप्रयोजकःमहत्त्वेउत्कर्षापकर्षवत्एकत्वे
अवांतरजात्यंतरासत्त्वेनसंकरानवकाशादित्यपिकेचित्चिंतामणिकृताजातिसंकरभयेनोद्भूतत्वमुपेत्यनीलत्वादिव्या

प्यभिन्ना अनुद्भूतत्वजातयः स्वीकृताः तत्रवच्छिन्नभेदकूटरूपोद्भवएवप्रत्यक्षताप्रयोजकरूपगतं तन्मतं निराकरोति अनुद्भू
तत्वमिति मानाभावादिति एकस्योद्भवस्य प्रत्यक्षताप्रयोजकत्वसंभवे तावतैवोपपत्तेरिति भावः उद्भूतत्वजातावच्छिन्नभेदस्या
नुद्भूतव्यवहारप्रयोजकत्वे शब्दस्फुरणादावपि तद्व्यवहारस्य संभवात् तद्व्याहत्तमनुद्भूतव्यवहारनियामकमाह शब्दस्फुरणादीति
अप्रत्यक्षत्वनिमित्तकरूपतिरूपस्य प्रत्यक्षरूपत्वादिति भावः अत एव जातिसंकरस्यारोपत्वादेवमेरं अपहृष्टं अपेक्ष्यावधित्वे
न विषयीकृत्य अस्यानुगतरूपस्य च उत्कटव्यवहाररूपेन संबंधः अनुगतरूपेन संकरपरिहाराय नानात्वेन स्वीकृताभि
रुत्कर्षजातिभिरुत्कटव्यवहारानुपपत्तिरर्थिनाविभिन्नजातीयेति मधुरसास्वादमधुरशब्दश्रवणादिरूपविभिन्नजा
तीयहेतुकसुखेति आदिः एतावता तत्तज्जातीयकारणप्रयोज्योत्कटानुत्कटसुखसाधारणजातिभिः सहोत्कटत्वस्य संक
रोदर्शितः तत्तत्कटत्वरूपजातीनामननुगमेपि शब्दगतकत्वादिव्याप्यनानातत्वानामिव सजातीयसाक्षात्कारप्रतिबं
धकतावच्छेदकसुखत्वजातित्वेन तासामनुगमसंभवादनुगतव्यवहारोपपत्तिरित्यतआह अननुद्भूतसुखत्वमिति मानाभा ३८

वेनेति सुखसत्वेऽवश्यं तत्साक्षात्काराभ्युपगमादिति शेषः सजातीयेति सुखनिष्ठोत्कटत्वस्य सुखसाक्षात्कारप्रतिबंध
कतावच्छेदकत्वासंभवादित्यर्थः यथा तारशब्देगृह्यमाणे मंदशब्दो नगृह्यते तथोत्कटसुखेगृह्यमाणे मंदसुखं नगृह्य
तइति न अपि तु तदुभयसत्वे समूहालंबनसाक्षात्कारएवेति उत्कटसुखस्य मंदसुखसाक्षात्काराप्रतिबंधकत्वादिति
भावः एवं चेदं सुखमस्मात्सुखादुत्कटमिति व्यवहारानुरोधात्पंचम्यर्थः सावधिकत्वं नावपि स्वीकृतिपत एव अयमस्मा
तारइत्यादौ तु सजातीयविषयकसाक्षात्कारे साद्यनुगतरूपप्रविष्टविषयित्वान्वयिप्रतियोगित्वमेव पंचम्यर्थ इति ता
रत्वादिजातीनां नसाधकत्वमिति ध्येयं इत्थं चेति संकरस्यारोपत्वेन चेत्यर्थः एकैक एव तिजातिसंकरस्यारोपत्वे एकह
स्तादिपरिमाणगतजातिविशेषैः संकरेण तैरेवानुपपत्तेरिति भावः न च संकीर्णजातिस्वीकारे शिंशपात्वादिलिंगकस्य सत्वा
द्यनुमानेविपक्षबाधकविरहेण व्यभिचारशंकानिरासंभवादारभ्यांतपुरुषीयतदनुमानविलोपप्रसंगस्य मूलेवक्ष्यमाण
स्यदुर्वारत्वेयेवेति वाच्यं अव्यापकस्याविरोधिनश्च धर्मस्य धर्मिभेदः कथं व्यापकत्वविरोधित्वोपपादकस्य तः स्वरूपेण संप्र

हकत्वाद्यनिरूपकस्यापिविशेषणविशेषावच्छिन्नस्यतन्निरूपकत्वमविरुद्धमितिसर्वकतांव्यक्तिभेदेनेत्यादेःस्पष्टयतिव्यक्ती
तिएवंसूनितुरगत्वविहगत्वादीनांअविशेषितानामेवसर्वमतसिद्धोविरोधोविलीयेततेषांसामानाधिकरण्येपिउक्तरिशा
संग्रहमतिपेक्षोपपत्तेरित्याहमूलेविलीनमिरानीमितितरतज्जातीयतापरेनतज्जातितरत्वजातीयोर्विवक्षणेतयोरविरो
धारसंगतिरतस्तत्परंव्याचष्टेतरेतरितिजातिसंकरबाधकत्वोक्तनियमानांद्वितीयनियमोपपादकतयापरिदृश्यमानेत्या
दिमूलंप्रथमनियमोपपादकतयाचयश्चेत्यादिमूलंव्याचष्टेमिथइत्यादिः यश्चयस्यजातिविशेषइत्यादिग्रंथस्यस्वव्यभि
चारिजातिव्यभिचारस्यजातौस्वीकारेअनिष्टप्रसंजनपरतांघटयितुंव्याचष्टेयस्येत्यादियज्जातीयस्ययज्जातिमतःविशे
षपदस्यव्याप्यार्थकत्वेःसंगतिव्याप्यस्यव्यापकव्यभिचारित्वाप्रसक्तेरतत्तद्व्याचष्टेएकदेशवृत्तिरितितज्जातिसमानाधि
करणाभावप्रतियोगित्वेसतितज्जातिमद्वृत्तिरित्यर्थः तज्जातीयंव्यभिचरेदितितत्तज्जात्यवच्छिन्नभिन्नवृत्तित्वंलभ्यतेन
भीनवृत्तित्वस्यव्यभिचरत्वर्थत्वात्तदेवतज्जातिव्यभिचारवृत्तिस्वव्यभिचारिजातिव्यभिचारलाभवृत्तिस्पष्टयितुमाहतांजाति

मितियावदितिशिंशपायांतत्तिलाभावात्तद्व्यभिचारोऽप्रकृतवृक्षतःशिंशपापदंव्याचष्टेशिंशपात्वमितिपादयंव्यभिचारेदिति
मूलेपादपभिन्नवृत्तित्वंलभ्यतेतदेवचपादपत्वजातिव्यभिचारवृक्षतःपादपपदंनधर्मपरतयाव्याख्यातंतादात्म्यहेतुनेतिशिंशपा
त्वादीनांवृक्षत्वादिव्यभिचारेशंकितेतदुभयधर्मवतोस्तादात्म्यरूपस्यतदुभयसामानाधिकरण्यस्यभंगप्रसंगेनविपक्षबाधकेनप्र
वृत्तस्यशिंशपात्वादिलिंगकवृक्षत्वादिनुमानेनेत्यर्थः संकीर्णजातिस्वीकारेव्यभिचारशंकायादुरुच्छेदत्वात्तदनभ्युपगमेचव्यभिचारेजा
तीत्वाभावप्रसंगस्यैवविपक्षबाधस्यसंभवादितिभावःविपर्ययवृक्षत्वादिनाशंकितंशिंशपात्वेवृक्षत्वाव्यभिचारनिश्चायकंतर्कंस्फुटीकुर्व
तेवृक्षेतिवृक्षस्वभावाशिंशपायदिवृक्षसमनियतंतदात्मानमेवानियतेदितिकःप्रसंगःवृक्षत्वस्यस्वभावत्वविरहेतत्परित्यागःसंभवे
त्तनतुस्वभावस्यशिंशपात्वस्येतितर्कमूलव्याप्तिरेवनसिद्धेदितिशिंशपायाःशिंशपात्वमिववृक्षत्वमपिस्वभावत्वेनतत्राभावयद
वृक्षस्वभावेतिवृक्षोवृक्षत्वंस्वभावोयस्यवृक्षत्वर्थःवृक्षसमनियतंवृक्षत्वंपरित्यजेत्तदात्मानमेवानियमेत्तशिंशपात्वरूपस्वभावम
पिपरित्यजेत्तद्वृक्षसामग्र्यंतर्गतसामग्रीकाशिंशपायदितत्सामग्रीमतिपक्षतापेजनकस्यसामग्रीमेवानियतायेतेस

रःतत्सामग्र्याहेतुसामग्र्यनंतर्गतत्वेहेतुसामग्रीशून्यकालेनहेतुत्पत्तिःसंभवतिननुस्वसामग्रीशून्यकालेस्वोत्पत्तेःस्वसामग्र्य
धीनत्वनियमादितिव्याप्तिरेवनसिध्येदितिहेतुसामग्र्यंतर्गतसामग्रीवत्वंपक्षविशेषणंतदर्थश्चतत्सामग्रीव्यापकसामग्रीकत्वं
स्वसामग्रीत्वव्यापकतत्सामग्रीत्वकत्वंवाएवंचस्वसामग्रीव्यापकसामग्रीशून्यकालस्यस्वसामग्रीशून्यतायाआवश्यकत्वाद्व्याप्ति
सिद्धिःसामग्रीप्रतिपत्तेतिसामग्रीविनेत्यर्थः अयंचतर्कःसंकीर्णजातिस्वीकारेपिदूषणंतर्कवत्शिंशपायदिवृक्षत्वंव्यभिचरेत्तत
दावृक्षसामग्रीविनाजायेतेतितर्कांतरमपिशिंशपात्वहेतुकवृक्षत्वानुमानसंपादकंतत्रैवतर्केदृष्टापत्तिशंकानिवर्तकतयोपे
युज्यतेमूलेतस्येहापीतिशालित्वकुर्वद्रूपत्वयोर्मिथोव्यभिचारबाधकस्यापितर्कस्यसंभवादितिसर्थः तादृशमेवतर्कंविवृणोतिदृ
विवृत्तौअंकुरेतिकुर्वद्रूपस्वभावःकुर्वद्रूपस्वभावःशालिरित्यनेनसंबध्यतेशालिरित्यस्यापियदितरतिपरेरित्यादिनाग्निमेतासं
बंधःतत्रसंतत्परद्वयंकुर्वद्रूपपरामर्शकंस्वपरद्वयंचशालिबोधकं शालित्वेकुर्वद्रूपत्वव्यभिचारबाधकंतर्कंप्रदर्श्यविपरीत
व्यभिचारबाधकंतर्कंदर्शयतिअंकुरकुर्वद्रूपंचेतिशालिस्वभावमितिकुर्वद्रूपात्मकपक्षविशेषणंएवंतत्सामग्र्यंतर्गतसाम

ग्रीकमिसपितसंबद्धेपरीत्यादौतुतत्परद्वयंशालिपरामर्शकंस्वपरद्वयंकुर्वद्रूपपरंतरभावद्वयस्यव्यावृत्तिविपर्ययेबाधका
भावइतिव्याप्त्यनभ्युपगमेनोक्ततर्कानवतारइत्यर्थःमूलेस्वभावत्वानुपपत्तेरितिशालित्वकुर्वद्रूपत्वयोरित्यादिःस्वभावत्वं
कुर्वद्रूपशालिस्वभावत्वंएतदनुपपत्तिःकुर्वद्रूपशालित्वाभ्यांतत्परित्यागस्वीकारात्तदुपपत्तौवापरित्यागेपिस्वभावत्वस्वीकारेवाविंबाध
कानुसरणेनेतिशिंशपात्वेपादपत्वव्यभिचारशंकानिवर्तकोक्ततर्कोद्भावनेनेत्यर्थःशिंशपायापःपादपत्वपरित्यागेपितस्यास्तत्स्व
भावत्वस्वीकारसंभवेनचव्याप्त्यसिद्धातत्तर्कस्याप्यनवतारादितिभावःअंकुरत्वंप्रतिबीजत्वस्याप्रयोजकत्वइत्यादिनातत्प्रति
नस्यप्रयोजकत्वव्यवस्थापनंनसंगच्छतेतिस्यस्याप्रयोज्यत्वादितिशंक्याप्रयोजकत्वंव्याचष्टेअप्रयोजकत्वइतिवैयधिकरण्यमि
तिआपादकत्वेनाभिमतस्यअंकुरत्वाप्रयोजकत्वस्यबीजत्वेपराभ्युपगमःअंकुरेबीजादुत्पत्तेरापादनमितिसेयंरूपमापाद्यापादकवै
यधिकरण्यमितिसर्थः अबीजपरस्यतत्रतुरूपत्वाशयेनेष्टापत्तिंविवृणोतिबीजभिन्नेतितदुत्पादानअंकुरोत्पादानुगमनें
कुरइतिरूपादौचव्यभिचारवारणायजातित्वइतिजन्यतावच्छेदकोपाध्यंतर्भावेनानियमेबीजत्वावच्छिन्ननिरूपितकार्यतावं

नच्छेदकतादृशोपाधिवज्जातिरपिनादृशीनबीजाजन्यवृत्तिः स्यात्जन्यतावच्छेदकत्वेजात्युपाध्योरविशेषादिसमयोजकत्वशंका
दतोजातित्वमपहायोपाधिसाधारणंजन्यतावच्छेदकत्वविशेषणंनिवेशयतिजन्यतेकुर्वद्रूपत्वस्यबीजवृत्तितयाआपादकासि
द्धिरतोमात्रेतिबीजवृत्तिकुर्वद्रूपत्वस्यतन्मात्रवृत्तित्वमपितैरुपेयतदस्यापादकाप्रसिद्धिरग्रेशंकनीयाबीजमात्रवृत्तितद्व्यक्तिवा
वच्छिन्नकारणतानिरूपितकार्यतानाश्रयवृत्तित्वस्यांकुरत्वेपरैरभ्युपगमादापादकासिद्धिरतःकार्यवृत्तित्वमुपेत्यकार्यतावच्छेद
कत्वनिवेशःआपाद्येबीजाजान्येतिबीजनिरूपितफलोपधानरूपजन्यताग्रहणार्थकंअन्यथाद्रव्यत्वेनबीजजन्यतायाःघटादा
वपिसत्वेनघटत्वादौव्यभिचारात्बीजत्वावच्छिन्ननिरूपितजन्यतायाःपरमतेक्वचिदप्यनभ्युपगमेननिवेशासंभवात्बीजज
न्यवृत्तित्वंजन्यतावच्छेदकताघटकसंबंधेनजातित्वघटितापादकपक्षेतुसमवायेनवाध्यमतौनेष्टापत्तिःअबीजादपितद्
वृत्तिप्रसंगइतिमूलतोनबीजमबीजमितिसमासेबीजभिन्नजन्यत्वमाश्रयस्यलभ्यतेनास्तिबीजंयत्रसामग्र्यामितिबहुव्रीह्या
दरेबीजासमवहितसामग्रीजन्यत्वंलभ्यतेननुबीजाजन्यत्वंकथमपीतिनशङ्क्यमस्मदुक्तेदृष्टापत्तावबहुव्रीहिमाश्रित्यवाचष्टेबीजासे

मवहितेतिअन्येषांवैयधिकरण्यादिपरिहारार्थंव्याख्यामुपन्यस्यतिअंकुरत्वमितिगगनादावंकुररूपादौचेतन्मतापाद्यसत्ता
तज्जातित्वादिविशेषणपरित्यागःअतएवांकुररूपादौव्यभिचारवारणायजातिरित्यापाद्यनिवेशितंद्रव्यत्वादौव्यभिचारवारणाय
मात्रेतिअत्रचोदकस्यत्वमप्रयोजकत्वंचारुचिवीजंबीजमात्रवृत्तिनाबीजमात्रवृत्तितयापरैरुपगतेनआपादकासिद्धिमितिबी
जमात्रवृत्तिधर्मावच्छिन्ननिरूपितकार्यतानवच्छेदकत्वस्यापादकस्यपरानभ्युपगममित्यर्थः कथमबीजेभविष्यतीतिमूलंन
थाचबीजगतविशेषणस्याबीजेसत्वासंभवात्बीजगतकुर्वद्रूपत्वस्यबीजमात्रवृत्तित्वोपगमस्तेषांसंभवत्येवेतिअंकुरत्वे
उक्तापादकसत्वंपरेषांनानुमतमितिभावः बीजस्यविशेषइत्यस्यबीजत्वव्याप्यधर्मइत्यर्थकत्वेऽसंगतिःअबीजेबीजगत
कुर्वद्रूपत्वसत्तामापादयतोनैपायिकस्यबीजत्वव्याप्यतायाअसिद्धेरतस्तद्व्याचष्टेबीजस्यबीजस्यविशेषइतिबीजैकदेश
वृत्तिजातिरितिबीजत्वाव्यापकत्वेसतिबीजवृत्तिजातिरित्यर्थः तज्जात्यव्यापकतत्समानाधिकरणजातेस्तद्व्यभिचारित्वनि
यमाद्बीजगतकुर्वद्रूपत्वस्याबीजेसत्वासंभवइतिशंकितुःपरस्याभिमानःजातिसंकरमनभ्युपगच्छतःपरस्योक्तनियमाभा

वादवीजेपिवीजैकदेशवृत्तिकुर्वद्रूपत्वसत्वेनबाधइतिनहीत्यादिमूलाशयंप्रकाशयतिशाल्यैकदेशेतिपरेषांजातिसंकरानुप
गमेशालिभिन्नबीजेकुर्वद्रूपत्वानुपपत्तिःशालिभिन्नवीजस्यांकुराजननकत्वंप्रसंजयतीत्यशालिपदंशालिभिन्नवीजपरतयाव्या
चष्टेअशालिरितिअवीजेपिवीजगतकुर्वद्रूपत्वसत्वमभ्युपेत्यादवीजंकुरोत्पत्तिप्रसंगंवारयतिमूलेअशालिवदितिअशालिविशे
त्यर्थःशालित्वैकार्यसमवेतत्वोपलक्षितकुर्वद्रूपत्वस्यांकुरजनेप्रयोजकतावद्वीजत्वैकार्थसमवेतत्वोपलक्षितस्यतत्प्रयोजकता
पक्षएववीत्वैकार्यसमवायस्यावीजांकुरजननाभावप्रयोजकत्वासंभवोक्तिसंगतिःननुतद्विशिष्टतत्प्रयोजकत्वोपगमेअतउप
लक्षणतापक्षेमूलोक्तबीजत्वैकार्यसमवायस्यांकुरजननियमनाशक्तिसंगमयितुंविशेषणतापक्षेचोपसंहाराशयस्तंदूष
णंस्पष्टयितुंवितर्कयतियत्रेतिस्तीयासमर्थानस्तीयांनानादृशवस्तुनार्थमाहशालित्वैकार्यइतियथाकुर्वद्रूपत्वस्योपलक्ष
णीभवताशालित्वस्यैकाधिकरणेनशालेरेवांकुरजननमितिननियम्यतइत्यर्थःप्रत्यक्षसिद्धत्वादित्यादिहेतुचतुष्कंशुद्धबीज
त्वमेवप्रयोजकमित्यत्रसंबध्यतेबीजत्वस्यप्रत्यक्षसिद्धत्वाभिधानेनकुर्वद्रूपत्वस्यविशेष्यस्याप्रामाणिकत्वंसूचितंलाघवात्

विशिष्टपक्षयालघुशरीरत्वात्शुद्धंकुर्वद्रूपत्वासहितं ननुबीजत्वेनहेतुत्वेनघटःसहकारिविकलस्यैकथमकरणमित्यतआह
करणाकरणेत्वितिसहकारीतिअप्रामाणिकावांतरजातिकल्पनामपेक्ष्यसहकारिसाकल्यादेःकार्यजननानुनप्रयोजकताक
न्याय ल्पनस्यैवव्याप्यत्वादितिभावःअन्यथासामर्थ्यस्यैवजननप्रयोजकत्वेपिजनकत्वस्यैवसूचकत्वादितिनावनाप्यप्रसंगवारणसंभ
वादप्रामाणिकावांतारजातिकल्पनानौचित्यादितिशेषःअथवान्यथेत्यस्यसहकारिसाकल्यैकल्ययोःकरणाकरणप्रयोजकत
याअतिप्रसंगभंगेपिवीजत्वविशिष्टस्यकुर्वद्रूपत्वस्यकारणतावच्छेदकत्वोपगमेइत्यर्थः सूचकत्वादितितेनापिरूपेणकारणा
नाप्रसंगादितिशेषःअयंव्यापारकलापइतिमूलंअंकुरादिसामान्यंप्रतिअन्वयव्यतिरेकग्रहविषयबीजत्वादिनैवकारणत्वमि
त्यादिनिश्चयरूपकार्यकलापइत्यर्थःबीजांकुरादेर्हेतुहेतुमद्भावनिश्चायकप्रमाणबलादेवबीजत्वांकुरत्वादेस्तदवच्छेदकत्वनि
श्चयइत्यत्तरयतितदुत्पत्तौतितदुत्पत्तिनिश्चयपदस्यकार्यकारणभावनिश्चयार्थकतामुपपादयतितदुत्पत्तिरितिकार्यकारण
भावइतिअंकुरादेर्विजादिकारणनिरूपितकार्यत्वमित्यर्थःप्रत्यक्षानुपलंभपदस्यकार्यकारणभावग्राहकप्रत्यक्षसहकारिभूतान्य

यव्यतिरेकग्रहार्थकतामुपपादयति प्रत्यक्षमिति कारणान्वयेकारणान्वयिन्यधिकरणे कारणव्यतिरेके कारणव्यतिरेकाधिक
रणे अन्वयव्यतिरेकग्रहस्य प्रमाणसहकारित्वमेव न तु प्रमाणत्वमिति तन्मात्रकथनेन प्रमाणानुयोगशांतिरतः प्रत्यक्षानुपलं
भपरं तत्सहस्तत प्रत्यक्षपरतया व्याचष्टे तथा चेति पञ्चावयववादिनो नैयायिकानां न्याये प्रयोक्तव्ये उदाहरणोपनययोस्वे प्रयोगः
सिद्धांतविरुद्धत्वमत आह परीत्येवेति परो ह्यवयववादी बौद्धः सन तर्कन्याय प्रयोगमाहेति विषयपरिशोधकतर्कप्रयोजकव्याप्यादि
प्रदर्शनपरं कुसूलस्थबीजसाधारणांकुरयोग्यतासाधकानुमित्यौपयिकन्याये प्रयुंक्ते इत्यर्थः परेरित्यस्य व्याख्या सोगतैरिति
व्यापकानुपलब्धिपरस्य कुसूलस्थबीजं यदि अंकुरयोग्यं न स्यात् बीजं न स्यादिति तर्कप्रयोजकांकुरयोग्यत्वाभावरूपापादकार्थ
कतोदर्शयति व्यापकस्येति प्रसंगहेतुरित्यस्यापादकपरतां स्फुटयति प्रसंगस्येति तर्कस्येत्यर्थः हेतुरिति तत्र चषष्ठीसमासः प्रसंग
परस्य प्रसंजकपरतया कर्मधारयोपि संभवतीत्याह प्रसंजकोवेति मूलेविपर्ययेकिं बाधकमिति कुसूलादिबीजमंकुरं प्रत्यप्रयोजक
मपि बीजत्वजातिमद्भविष्यतीति कथितप्रसंगविरोधिव्यभिचारसंदेहे किं बाधकमित्यर्थः अंकुरस्य जातिप्रतिनियामकाकस्मिके

त्वप्रसंगस्तिबीजत्वेनांकुरत्वजातप्रयोजकत्वेन तु कुरणीत्वादेरप्यकुर्वत्साधारणत्वेनानवस्थात्तादृशजातेः प्रतिनियमः प्रतिनि
यमत्वं च चिरेवधर्मिणि सत्वमिति यावत् तस्याकस्मिकत्वप्रसंगो विपर्ययेबाधकइत्यर्थः अंकुरस्य हि जातिप्रतिनियमात् निर्नि
मित्तकइत्यत्रिमेष्टापत्तिवारणानुसारेणाकस्मिकत्वं निर्निमित्तकत्वरूपतया व्याचष्टे विहस्तो आकस्मिकत्वमिति निर्निमित्तक
त्वं प्रयोजकशून्यत्वं बीजत्वस्याकुर्वाणेपि निर्विवारतया आपाद्याभावरूपेणतेनांकुरप्रयोजकत्वरूपापादकविपर्ययसिद्धिरित्याह
मूले बीजत्वं तस्येत्यादिना विचारयति इमितीत्यनंतरं व्याप्यसधर्मतासत्वादिति शेषः स्वभावहेतुरित्यस्य बीजत्वमित्यादिः स्वभा
वहेतुरित्यस्य व्याख्या विरुद्धाभावानुमापको हेतुरिति विपर्ययानुमापको हेतुरित्यर्थः स्वपरस्य विपर्यपरतया भावरूपपरस्य प्राप्त्यर्थ
कमप्राप्तिकतया सिद्ध्यर्थकत्वेन स्वस्य भावो यस्मादिति बहुव्रीह्याश्रयणेन स्वभावपदाद्विपर्ययानुमापकत्वलाभः बीजस्य
धर्मिणो हेतुत्वं मूलाभिप्रेतमित्याशयेनास्वभावपदस्य तादात्म्यार्थकत्वमवलंब्य वर्णयतामन्येषां मतमाह तादात्म्येति तादात्म्य
संबंधेन हेतुस्तादात्म्यहेतुः बीजत्वस्यापि हेतुतासंभवात् तादात्म्याभिधानमयुक्तमित्यस्वरसं बीजं तत्रोत्पादितो निर्निमि

तकत्वहेतिशेषः अनिष्टं तादृशजातावनिष्टेतरप्रसंगो नित्यहेतिजातिप्रतिनियमस्य निर्निमित्तकत्वेपि तादृशजातेः सार्वत्रिकत्व
विरहेणव्यभिचारान्निर्निमित्तकत्वस्य यथाश्रुतसार्वत्रिकत्वप्रसंजकतानसंभवीति सार्वत्रिकत्वं व्याचष्टे कार्यमात्रहेतित्वमि
तिवैय्यधिकरण्यादिशेषं निराचिकीर्षुः प्रसंगं परिहृत्य दर्शयति तथाचेति जातावच्छिन्नकार्यजनकस्य जातिप्रतिनियमप्रयोजक
तया जातेः कार्यतानवच्छेदकत्वएव जातिप्रतिनियमनिर्निमित्तकत्वस्य पर्यवसानमित्याशयेन कार्यतावच्छेदकत्वाभावस्यैव जा
तिरूपपक्षे सार्वत्रिकत्वप्रसंजकत्वं दर्शितं तावतावैय्यधिकरण्यपरिहारः यद्यपि कार्यतायाः कारणतानिरूपितत्वं कारणतायाः कि
ञ्चिद्रूपावच्छिन्नत्वं च नियतमिति कार्यतायां किंचिद्रूपावच्छिन्नेत्यादिविशेषणमव्याघातकं तथापि बीजत्वे बीजनिष्ठांकुरकारणतावच्छेदकत्वस्य तादृशकारणतायां धर्मेतिरानवच्छिन्नत्वनिश्चयात् परिशेषेणसिद्धये तादृशविशेषणोपादानं कार्यमात्रसमवेतगुणकर्मणोः कार्यतानवच्छेदकत्वाद्व्यभिचारः स्यादित्यापाद्येजातिविशेषणं तथाच कार्यमात्रसमवेतं नित्यं नस्यादित्यापाद्यार्थः परिशेषश्रुद्धयेः न्यनिमित्तकत्वं मूलसूत्रानिराकृतमिति स्फुटयति तथाचेति सनिमित्तकत्वसाधकं किंचिद्धर्मावच्छिन्नकारणताप्रतियोगि

कार्यतावच्छेदकत्वसाधकं कृतशालित्वादिवाधः यथा यं कुरे व्यभिचारेण शालित्वादेरंकुरत्वावच्छिन्नजनकतावच्छेदकत्वबाधः शा
लित्वादिसाधारणबीजत्वावांतरजातेरवच्छिन्नत्वस्य तादृशजनकतायां बाधनिश्चयासंभवात् तन्निश्चयकार्यकारिणस्तत्र तादृश
जातेरवच्छिन्नत्वसंभवतो विरोधिगौरवस्यानस्य सहकारितामात्रकल्पनेति बीजत्वस्य निमित्तत्वं कारणतायां बीजत्वावच्छिन्न
त्वं सेयं निमित्तवतेनिमूलस्यैवानुकथनं विपक्षादिसम्यग्व्याख्यानिर्निमित्तादिव्याप्यमारायेत्यस्य पर्यवस्यतीत्यर्थः कैश्चिदाम्यनी
सत्रयोगासंभवान्निवर्त्तमानेत्यस्य पूर्वेण द्योजनं व्याप्यपरस्य प्रहृतहेतुपरतां प्रकाशयितुं मध्ये पूरयति कार्यमात्रहेतित्वजातित्व
मिति निर्निमित्तानन्निवृत्तिश्च तादृशयाथाभावरूपहेतोर्निरूक्तसनिमित्तत्वरूपापारकव्यतिरेकव्याप्तिनिर्वाहेनपयुज्यनवृत्ति
मूलेतमदर्शनं अंकुरत्वे निमित्तवतासिद्धिमंतरेण बीजत्वस्य प्रयोजकत्वे पर्यवसानासंभवात्तत्र तत्सिद्धिबोधकशब्दं पूरयति अं
कुरत्वे सिध्यंतीति बीजप्रयोजकतायां बीजत्वस्यांकुरकारणतावच्छेदकतायां विश्राम्यति तत्सिद्धिपर्यवसितसिद्धिकं भवति ननु
परिशेषादंकुरत्वे पक्षे साध्यविशेषो बीजत्वावच्छिन्नप्रयोज्यत्वमेव सेत्सुमर्हति ननु बीजत्वावच्छिन्नेऽंकुरप्रयोजकत्वमित्याशंक्य

निराकरोति अकुरत्वस्येति तुल्यविति विघ्नयेत्यादि उक्तानुपपत्तावीजप्रयोजकतायामित्यस्यैव बीजप्रयोज्यतायामित्यर्थक
त्वमभ्युपगच्छतोमतमाह बीजमिति बीजत्वस्यांकुरकारणतावच्छेदकत्वसाधकपरिशेषासिद्धिं शंकते यद्यपीति एतावतापीति
शालित्वादेरंकुरत्वावच्छिन्नप्रयोजकतामात्रेणापीत्यर्थः प्रयोजकत्वं कारणतावच्छेदकत्वं अंकुरत्वावच्छिन्नं प्रतीत्यादिनासिध्यती ति।
सनिमित्तकत्वसामान्यसाधककार्यमात्रहेतिजातित्वरूपहेतोरित्यादिः क्षितित्वादेरपीति बीजसहकारिणावच्छेदकतयाभिमतस्य
क्षितित्वसलिलत्वादेरेकतरस्यनिमित्तताभारायापिपर्यवसानसंभवादित्यर्थः अकुर्वाणसाधारणरूपस्येति अंकुरानुपहितक्षि
त्यादिसाधारणस्यचिह्नमस्येत्यर्थः सिद्धमाहितमिति तावतैवसमर्थस्यापिसहकारिविरहेणाकरणमित्यस्यहेत्वोपपादकस्य
सिद्धेरित्यर्थः तावतासमर्थस्यकरणाविलंबनियमरूपस्याकुर्वाणसाधारणधर्मकरणतावच्छेदकत्वबाधकस्यनिरासेधरणीत्वा
देरिवबीजत्वादेरपिकारणतावच्छेदकत्वसिद्धिरन्वयनिरेक्षबलान्निश्चयहेतवेत्याह अस्तेवे अन्यमतमाह प्रागुक्तेइति अबी
जादंकुरोत्पत्तिप्रसंगइति बीजत्वेनांकुराजनकत्वं बीजासमवहि तथरणत्वादिनांकुरोत्पत्त्यापत्तेर्बीजत्वेनतद्धेतुताव्यवस्थापक

क्ष्य

तिर

त्वरत्यर्थः इत्यनुशयेनेति धरणित्वादेरपिकारणतावच्छेदकत्वसंभवेनांकुरत्वेसानिमित्तकत्वसाधकहेतोर्नबीजत्वस्यकारण
तावच्छेदकत्वसिद्धिरित्येतत्कल्पेऽपरितोषेणेत्यर्थः मूलेहतमंकुरप्रहेणेति अतंबीजत्वस्यांकुरकारणतावच्छेदकत्वपर्यंतव्यव
स्थापनानिर्बंधेनेत्यर्थः वक्ष्यमाणयुक्त्यातस्यकिंचित्कार्यकारणतावच्छेदकत्वसिद्धेवनरवच्छिन्नसमवधानानंतरंतत्का
त्कार्योपधानस्यानियमेनोक्तहेत्वर्थबाधकनिरासात्समीहितसिद्धेरितिभावः बीजस्वभावत्वं बीजत्वजातिः बीजत्वेनबीजस्य
किंचित्कार्यानुपयोगेपिबीजस्यनबीजस्वभावत्वानुपपत्तिः नहिबीजनिष्ठकार्योपयोगितावच्छेदकतयैवबीजत्वेबीजशक्ति
त्वसिद्धिः तस्यतत्स्वभावतायाःप्रत्यक्षसिद्धत्वात् नचयन्निष्ठायांकार्योपयोगितायामनवच्छेदकंयत्तत्तद्वृत्तीत्यादिव्या
प्त्याबीजनिष्ठकारणतानवच्छेदकत्वेनबीजत्वेबीजाद्वृत्तित्वापत्तिसंभवात्तत्रबीजनिष्ठकारणतावच्छेदकत्वसिद्धिरिति
वाच्यं बीजादिगतानांचैतावलोकितत्वाद्युपाधीनांरूपादीनांचकिंचित्कारणतानवच्छेदकतयातद्व्यापत्त्यसंभवादित्यतोबी
जस्वभावमित्यादेरभिप्रायमाह विवृतोपरेषामिति परेषांबौद्धानांजातिमात्रस्यतद्वृत्तिजातित्वावच्छिन्नस्यजनकतेतिनह

प्रा१

प्र२-

तिजनकत्वेत्यर्थः नैपत्यमिति अभिमतमिति शेषः तथा च तादृशनियमबलाद्बीजवृत्तिकारणतानवच्छेदकजातित्वे
नतदवृत्तित्वापत्तिसंभवइतिभावः नेतिपक्षे कुचिदपिकार्येनप्रयोजकमितिपक्षेमूलेतत्त्वभावमितिबहुव्रीहिः बीजमि
ति स्यादितिशेषः अकुर्वाणसाधारणीबीजत्वजातिरेवतेषांनास्तिकुत्रोक्तापत्त्याकारणतावच्छेदकत्वसिद्धिरित्याशंका
निराकरोति एवंचेतिविशेषोस्तीतिमूलस्थंविशेषइतिव्याचष्टे कुर्वद्रूपत्वमिति प्रयोजकमितिपक्षंतेषांकुत्रचित्कार्यप्र
१८ योजकमितिप्रथमपक्षावलंबनंदूषयतीतितादृशकार्याकारणतादृशापन्नबीजसाधारणेनसमर्थस्याप्यकरणंदुर्वारमि
त्यनेननिराकरोतीत्यर्थः एतेनैतत्पक्षस्यस्वमतेऽदुष्टत्वेपिनासंगतिः अंकुरप्रयोजकत्वपक्षेतन्मतेवक्ष्यमाणदूषणसत्वा
त्तमप्यंतर्माव्यक्तचिरितिव्याचष्टे अंकुराद्यविति उपयोगपदार्थकारणत्वान्वयिनिरूपकत्वंसमभ्यर्थः तत्त्वत्तादृशमाधा
रत्वमित्याविष्कर्तुंकार्यइतिअत्रकस्येत्यस्योपयोगइत्यनेनैवान्वयः अन्यस्यतदन्वयिनोऽभावात् एकस्यैवोपयोगइत्य
त्रैवचतेनरूपेणेत्यस्यान्वयःसर्वेषामुपयोगप्रसंगेनादृष्टादितिहेतोर्वक्ष्यमाणनयेचतेनरूपेणोपयोगिलाभात् एकस्यो

पयोगइत्यत्रतेनरूपेणेत्यस्यासंबंधेबीजत्वरूपस्यकार्यप्रयोजकत्वपक्षाभ्युपगमालाभात् प्राक्तनस्येनरूपेणेत्यस्यव्यवहित
त्वेनानुषंगानौचित्यादितिपतःएकस्यतेनरूपेणोपयोगइतियोजनाभिप्रायेणतत्क्रमेणव्याचष्टे एकस्येति अस्यव्याख्याकुर्वद्रू
पस्यबीजस्येतिअंकुरादिकिंचित्कार्यकुर्वद्रूपस्यबीजस्येत्यर्थः तेनेत्यस्यव्याख्याबीजत्वेनेतिरूपेणेतिमूलानुवादः उपयो
गइत्यस्यव्याख्याजनकत्वइतिस्वीकृतइतिशेषः सर्वेषामविशेषइतिमूलंसर्वेषांबीजानांअंकुरादिकुर्वद्रूपबीजविशेषा
भावसिद्धिरित्यर्थः तत्रकुर्वद्रूपविशेषवत्त्वेनोभयसिद्धंबीजंतत्साधारणरूपेणपक्षत्वेपिअकुर्वद्रूपाणामपिसर्वेतर्ग
ततयावच्छेदकावच्छेदेनसाध्यसिद्धेरुद्देश्यतयानसिद्धसाधनदूषणावसरइतिसूचयितुंतादृशबीजानांसर्वपदार्थांतर्गत
त्वंस्फुटयति अंकुराद्यकुर्वद्रूपाणामपीतिबीजत्वेनसर्वेषामविशेषेणनविवादः कुर्वद्रूपत्वेनविशेषोविवक्षितइत्यतःप्रद
र्शयति अंकुरादिकारणत्वेनेति तृतीयार्थोऽभेदः कुर्वद्रूपाद्विशेषोवैलक्षण्यमंकुराद्यकारणत्वंतदभावेतृतीयार्थाभेदा
न्वयोबोध्यः अविशेषपदेऽभावप्राधान्येनतत्पुरुषासंभवः अव्ययीभावोपगमेऽविशेषामित्येवंस्यादतोदादिनाम

विवारदृसत्रेवाकारोनञ्समानार्थकोऽसमस्तएवेतिसूचयितुंनञ्परेनाशब्दार्थंकुर्वन्व्याचष्टे नेति तदेवरूपंधर्मोयस्यतत्तथाद्रूप्यंतत्परस्यबीजत्वपरामर्शकतयाबीजत्वधर्मित्वरूपंतत्रविशेष्यस्यानतिप्रयोजनकतयाबीजत्वमेवांकुरादिकारणत्वरूपाविशेषसाधनेहेतुःतस्यांकुरादिकारणत्वव्यभिचारेपरैःस्वीकारितस्यतत्कारणतावच्छेदकत्वमेवनोपपद्यतइतिसर्वंसूचयितुंबीजत्वेउपरंजकंतज्जनकतावच्छेदकत्वमंतर्भाव्यताद्रूप्यादिभिर्व्याचष्टे अंकुरादीति तन्मतेसर्वदैवबीजस्यस्वकार्योत्तरबीजादिकारितयाकथंकिंचिदेवबीजंस्वकार्यंकुर्यान्नापराणीतिमूलासंगतिरतःस्वकार्यमितिव्याचष्टे अंकुरादीति अंकुरादिषुमध्येयादृशकार्यंप्रतिबीजत्वेनकारणत्वमुपगच्छसितादृशमित्यर्थः त्वमतेकुसूलाद्यवस्थितबीजानामन्यदंकुरकारित्वात्परपदेनांकुरकर्तृभिन्नविवक्षणेकुसूलस्थितादृशपन्नतबीजानांतदाऽकारिणामप्यसंग्रहःस्यादतस्तत्संग्रहायापराणीतिव्याचष्टे अंकुराद्यकुर्वद्रूपाणीतियादृशकार्यकारणत्वंबीजत्वेनोपेयतेतादृशकार्यकिरणादृशावच्छिन्नानीत्यर्थः तादृशानांबीजभिन्नानांबीजत्वरूपकारणतावच्छेदकधर्मशून्यतयाअकरणनिर्वहती

स्तो

तिबीजानीतिनापराणीत्यत्रव्यवहितस्यापिकथमित्यस्यवचनविपरिणामे नकुर्यादित्यस्याप्यनुषंगंदर्शयति कथंकुर्युरिति अकरणानुपपत्तिप्रयोजकंपराभ्यपगतंसहकारिविरहस्याकरणप्रयोजकत्वमाकांक्षानुरोधेनपश्यति यदीतिनचेत्यादिनानिराकरणीयाशंकार्थंनिहृष्यदर्शयति अथेतिवस्तुमात्रंवस्तुत्वावच्छिन्नंनित्यवस्तुसत्वेवस्तुसामान्यस्यबीजकार्यत्वमप्रसक्तमतःक्षणभंगवादिनांनित्यपदार्थानभ्युपगमात्तत्प्रसक्तिरित्याह अस्माकमिति अस्माकंक्षणभंगवादिनां नचवस्त्वकारीतितथाचवस्तुत्वावच्छिन्नंप्रतिबीजत्वेनकारणत्वेसर्वेषांबीजानांसर्वदाबीजकारित्वप्रसंगस्य। बाधकस्येष्टापत्त्याऽसंभवइतिभावः वस्तुमात्रंप्रतिबीजत्वेनहेतुत्वेपिबीजभिन्नाबीजसमवहितात् वस्तुत्वादीनविरुध्यतेअतोऽबीजपरमन्यथाव्याचष्टे बीजशून्यकारणकलापादिति बीजाघटितघटादिसामग्रीतदुक्तेर्थः तदनुत्पत्तिप्रसंगादितिव्याचष्टे तस्येति तत्परस्यानुत्पत्तिपरेनैवषष्ठीसमासोनप्रसंगातेनेतिस्पष्टयितुंमनुत्पत्तिप्रसंगादित्यनुक्त्वाअनुत्पत्तेःप्रसंगादित्यस्यैवमासेनारलिखनंमूलेबीजमात्रमितिबीजत्वावच्छिन्नमित्यर्थकंख

मतेबीजस्यबीजजनकत्वविरहेपिपरेषांतदभ्युपगमसंभवमुपपादयतिविद्वत्तोपरेषामितिबीजत्वस्यबीजत्वावछि
न्नकार्यतावछेदकत्वेतन्मतेतादृशकारणविरहेणबीजसंतानांतःपातादिबीजाउत्पादस्यांकुरानुत्पादस्थलेपिबी
जधारायाअविच्छेदस्यचापत्तिःसंभवतीतिस्वयंतद्दोषमाह माप्यमिकेति बीजसंतानानुपरमेति एवंबीजजनन
समर्थस्यबीजस्यसत्वेतन्मतेबीजानुत्पादप्रयोजकविरहादितिभावः नाप्यंकुराद्यन्यतममात्रमितिमूलंअत्रांकुरा
द्यन्यतमत्वस्यकार्यतावछेदकतायाःशंकितुरभिप्रेतत्वेएवमंकुरोत्पादप्रसंगरूपदूषणासंगतिःउक्तकार्यतावछेदका
क्रांतस्यबीजस्यैवएवमुत्पादात्अंकुरत्वस्यकार्यतानवछेदकतयातदवच्छिन्नोपादनायोगात्अंकुरत्वबीजत्वादेः
कार्यतावछेदकतायाअभिप्रेतत्वेतत्पक्षेएवोक्तस्यांकुरकारिणोपिबीजोत्पत्तेःप्रसंगस्यदुर्वारतयाआशंकायाएवा
नुत्थानंयद्यपितथापिसमर्थसत्वेतत्कार्यतावछेदकयत्किंचिद्धर्मावछिन्नोत्पत्तिनियमःननुयावत्कार्यतावछेदकावे
छिन्नोत्पत्तेः एवंचबीजत्वादीनांकार्यतावछेदकत्वेपिनांकुरकारिणोबीजापत्तिः अंकुरजननेनैवतादृशनियमस्य

चरितार्थत्वादित्याशयेनशंका एवंचअंकुराद्यन्यतमपदंअंकुरत्वाद्यन्यतमावछिन्नार्थकंनानारूपाणांकार्यताव
छेदकत्वेपिप्रसेकरूपावछिन्नानुत्पादेसहकारिविरहप्रयोजकतायाआवश्यकत्वात् अन्यथातिप्रसंगात् समर्थस
त्वेऽवश्यंतदीययत्किंचित्कार्यतावछेदकावछिन्नोत्पत्तिरितिनियमस्याप्रामाणिकतयाछेर्यसिद्धिरितिदूषणाश
यः मूलेमात्रपदंसर्वोपप्रहायोपात्तमितिप्रकाशयितुंव्याचष्टे कदाचिदिति बीजांकुरादीनांसर्वेषांयुगपदनुत्पा
देपिसर्वेषांबीजकार्यत्वाविरोधइत्येतत्सूचनायकदाचित्पदानामुपादानं अनुभवःस्वप्रत्यक्षं अंकुरानुत्पादकच
रमबीजाभिप्रायेणतदुपादानं बीजानांसर्वेषांप्रत्यक्षानियमोप्येतत्पक्षदूषणतयाबोध्यः प्रागपीतिमू
लेप्राक्पदंअंकुरोत्पत्तिपूर्वकालपरं तदुत्पत्तौसत्यतत्पदस्यप्रक्रांतांकुराद्यन्यतमपरत्वेप्रागन्यतमांतर्गतबीजस्य
तन्मतेउत्पत्त्यानदुत्पत्तिप्रसंगेदूषणापत्तिरतस्तत्पदमंकुरमात्रपरामर्शकतयाव्याचष्टे प्रागंकुरस्येति उत्पत्तिप्र
संगादित्यनेनसंबध्यते एतत्पक्षेअंकुरोत्पत्तिकालेबीजापत्तेरपिसत्वेनन्यूनताभंगायतामपिपर्यति पश्चाच्च

बीजस्येति चरमबीजोत्पत्तेःपश्चाद्बीजस्येत्यर्थः मूलाशयस्थहेतुमाह बीजत्वेनेति अंकुरादीति अंकुरत्वाद्यव
छिन्नेत्यर्थः अवांतरजातिभेदं व्याचष्टे तत्तत्कार्येति अंकुरादीत्यर्थः अंकुरत्वादेः कार्यतावच्छेदकत्वोपगमएवप्रा
गंकुरस्यपश्चाच्चबीजस्योत्पत्तिप्रसंगोघटतेनत्वन्यतमत्वस्यकार्यतावच्छेदकत्वोपगमेऽतत्त्वंपक्षंदूषणांतरेणनि
राकर्तुमाशंकते अथेति नन्वेवमंकुरत्वाद्यवछिन्नंकस्यकार्यमित्यतआह अंकुरादयस्त्विति व्यक्तिस्थानीया
इति तथाचताव्यक्तित्वावछिन्नमिवांकुरत्वाद्यवछिन्नमपिनकस्यचित्कार्यमितिभावः दूषयति नैतदपीति प्रा
थमिकबीजेति तत्पूर्वबीजसाधारणान्यतमत्वावछिन्नहेतुमत्तबीजाभावादितिभावः कार्यतावच्छेदककोटौप्रथ
मबीजव्यावर्त्तकविशेषणप्रवेशेप्रथमबीजानुत्पत्तिप्रसंगाभावादोषांतरमाह अंकुरत्वावछिन्नेति अवश्यव
क्तव्यत्वादिति अन्यथातत्त्वछिन्नजननेनियमानुपपत्तेःकार्यनिष्ठतत्तद्व्यक्तित्वमपितत्तत्कारणव्यक्तिकार्यता
वच्छेदकमुपेयतेइतिभावः मानाभावादिति अन्यतमत्वघटकतावच्छेदकतत्तद्धर्मावछिन्नोत्पत्तिनियामकादे

वतदवछिन्नोत्पत्तिनियमोपपत्तेरितिभावः यद्येनरूपेणेत्यादिमूलस्ययद्यद्रूपावछिन्नकारणताशून्यंतत्तद्रू
पवत्यथाकुंजरत्वावछिन्नकारणताशून्यंबीजंनकुंजरत्ववदित्यर्थः बीजादिष्टरूपाधीनांबीजादिनिष्ठकारणतान
वच्छेदकतयाव्यभिचारमाशंक्याह रूपमिहेति रूपपदेनजातिर्विवक्षितानधर्ममात्रं तथाचपदेषांजातिमात्रस्यज
नकतावच्छेदकत्वनियमात्तेषांनोक्तनियमेव्यभिचारइतिभावः यद्यप्यंकुरसामग्रीप्रविष्टक्षेत्रस्थबीजानामपिप्र
हतापत्तोपक्षत्वंसंभवतितेषामपिपरैर्बीजत्वेनकारणतानभ्युपगमेनोपदर्शितापादकसत्तायास्तत्रपराभ्युपग
तत्वात् बीजत्वाभावरूपापाद्यव्यतिरेकस्योभयसिद्धत्वाच्चतथापिविपर्ययानुमानप्रयोगेबीजरूपाश्चैतेकुसूल
स्थादृक्रूपनयस्यवक्ष्यमाणतयातदविरोधायशणाद्यादयःसामग्रीप्रविष्टादृत्यत्रसामग्रीपदंनांकुरसामग्रीप
रंकिंतुयत्किंचित्कार्यसामग्रीपरं तावताकुसूलस्थानामपिपक्षत्वलाभइतिव्याचष्टे यत्किंचित्कार्येति कुसूलस्था
दयइत्यादियदेनक्षेत्रादिस्थपरिग्रहः तेषामपिपक्षत्वसंभवेनतत्परित्यागानोचित्यात् एवंचाग्रिमस्यकुसूल॰

स्थादित्यस्यापि कुसूलस्थारयदित्यर्थो बोध्यः स्वमते बीजत्वेन बीजानामर्थक्रियासंप्रयोगाद्बीजत्वेनार्थक्रियासंप्र
योपयुज्यनदित्येतावन्मात्राभिधानमसंगतमतो नोपकुर्वंतदित्यस्य शेषं पूरयति परमतदिति तावतैवापारकत्वं
तस्य निर्वहतीति भावः मूलेव्यापकानुपलब्धिरिति व्यापकाभावदित्यर्थः प्रसंजकहेतावापाद्यव्यतिरेकव्यापका
भावरूपतां स्पष्टयति तद्रूपतायादिति तद्धर्मकतायादित्यर्थः अर्थक्रियां प्रति योग्यतयेति तद्रूपावच्छिन्नयत्कि
ंचित्कार्यकारणतयेत्यर्थः अन्यथेति तद्रूपावच्छिन्नकारणतायां सत्यस्यापि तद्रूपवत्त्वादित्यर्थः अतिप्रसंगादिति वि
वृतिसूच्याचष्टे बीजादेरपीति कुंजरत्वप्रसंगादिति भवतां बीजत्वकुंजरत्वयोरविशेषादिति भावः स्वभावेन साम
ग्रीनिवेशिनदित्यत्र स्वभावपदं नोभयसिद्धजातिपरं तादृशजातीनां क्षणभंगमतेकारणतायामनवच्छेदकतया
सामान्यव्याप्तौ यद्रूपपदेन तदुपादानासंभवेन तद्रूपावच्छिन्नभावानां दृष्टांततानुपपत्तेः नापि कुर्वद्रूपत्वजाति
परं तस्याः न्यायमतासिद्धतया तदवच्छिन्नदृष्टांतस्योभयसिद्धानुपपत्तेरतः सामान्यतः स्वहेतुजातिपरतया

स्वभावपदं व्याचष्टे स्वीयो भावदिति सामान्यतश्चदृष्टांतत्वेति स्वहेतुजातित्वेन जातेर्दृष्टांतघटकतादित्यर्थः त
थाचयथास्वहेतुजातिरूपेणसामग्रीप्रविष्टाभावास्तादृशजातित्वेन जातिपुरस्कारेणार्थक्रियोपयोगीनदित्यदि
ष्टांतार्थः परमतेतादृशजातिः कुर्वद्रूपत्वं अस्माकं तु बीजत्वादिकमिति सामंजस्यं बीजानुमित्यादेर्बीजकार्यत्वाभा
वादनुभवपदं विशेषपरतया व्याचष्टे साक्षात्कारदिति तन्मतेंद्रियप्रत्यासत्तिर्न प्रत्यक्षहेतुः अप्रत्यासन्नस्यें
द्रियस्य प्रत्यक्षजननकतावच्छेदकं कुर्वद्रूपत्वाभावेनैवाग्राहकत्वोपपत्तेरिति इंद्रियप्रत्यासत्तेरसदाजनत्वमकिंचित्क
रमतः स्वमताभिप्रायेणतदभिधानं संगमयति प्रत्यासत्तेरिति अस्मन्मतदिति तथोत्पादविशेषस्येति कुर्वद्रूपत
योत्पन्नस्य चक्षुरादिगोलकविशेषस्येत्यर्थः मूलेतन्नभवेदुपादेयमिति सर्वबीजाव्यभिचारि अतीद्रियं बीजत्वा
वच्छिन्नं कार्यं न बीजोपादानकारणकमित्यर्थः उपादेयकार्यस्यामूर्तत्वादेरनुक्तत्वादमूर्तादिकार्यस्योपादेयत्व
खंडनमसंगतमतस्तत्संगमयितुमुपादेयकार्यं विशतिकारो विचर्कयति उपादेयमप्यमूर्तं वेति आद्यदिति दोष

माहेतिशेषः नन्वमूर्त्तस्यरूपादेर्मूर्त्तेघटाद्युपादेयतयाऽमूर्त्तस्यमूर्त्तानुपादेयत्वादित्यसंगतमतआह एतच्च
परमतेनेति परमतएवरूपादीकथंननियमभंगदूषणाकांक्षायामाह तेषामिति तेषांपरेषांरूपाद्यतिरिक्तस्यस्व
वृत्तिगुणादिभिन्नस्यद्रव्यस्याभावात्अनंगीकारात्रूपादेवमूर्त्तत्वादितिमूर्त्तोपादेयरूपादेर्मूर्त्तत्वादेवेत्यर्थः
तथाचरूपादेर्मूर्त्ततयास्वभिन्नमूर्त्तोपादानोपादेयत्वेपिअमूर्त्तताविरहेणनोक्तनियमेव्यभिचारइतिभावः मू
र्त्तेपरिदृश्यमानमूर्त्तप्रतिरतनयेतिबीजकार्यपरिदृश्यमानमूर्त्तोत्तरविरोधेनेत्यर्थः मूर्त्तोत्तरस्यबीजत्वावच्छि
न्नकार्यतयास्वीकृतस्यातीन्द्रियमूर्त्तस्यनदृश्यस्यनबीजोपादानकस्यानुपपत्तेःपरिदृश्यमानमूर्त्तोत्यतिसंगत
सत्यसंभवात् मूर्त्तयोःसमवायेनएकदाएकदेशताविरहनियमादितिभावः बीजोपादेयंपरिदृश्यमानमूर्त्तंकि
मित्याकांक्षायामाह विदृश्योपरिदृश्यमानमिति उत्तरोत्तरबीजमितिचरमबीजोपादेयस्यांकुरस्याप्युपलक्ष
णमिदंबीजोपादेयकार्यांतरंनिराकृत्यान्योपादेयंतत्कार्यंनिराकरोति मूलेनापिसहकार्यमिति सहकार्यपरात्क

१हा

यमुक्तकार्यलाभइत्यतस्तत्यतस्तत्परंव्याचष्टे उपादानसाहित्येनेति उपादानांतरेणसहेत्यर्थः यद्धियतेबीजेनयज्ज
न्यतेमूलेमिथःसहकारिणामव्यभिचारानुपपत्तेःतत्कार्योपादानांतरबीजरूपतत्कारणनोतत्कार्यजननेपरस्परसहकारि
णांएकविरहेपरस्यकार्याजननानुपपत्तेरित्यर्थः समर्थस्यक्षेपायोगादितिभावः तावताकोदोषइत्याकांक्षायामाह विदृश्यो
तथाचेतिउपादानसहकारिणोरितिउपादानस्यविरहेपिसहकारिसत्वेसहकारिणोविरहेपिचोपादानसत्वेकार्योत्पादोपग
मेव्यभिचारादुपादानस्यतत्सहकारितयोपगतस्यबीजस्यचाकारणत्वंस्यादित्यर्थः तयोरेकासत्वेपरस्मात्कार्योत्पादानु
पगमेबाधकमाह अनुत्पादेचेतिसिद्धमितिसमर्थस्यापिसहकारिविर—हादकरणंसिद्धमितियोजना तथाचगतंसंग
भंगेनेतिभावः न्यूनताभंगायसर्वबीजाव्यभिचारिकार्योत्तरमाश्रीयंव्यस्वयंनिराकरोति नचध्वंसएवसाधारणंकार्यमि
तिध्वंसःस्वध्वंसःकार्यातिरिक्तस्यबीजांतरादिरूपबीजकार्यस्यतवसौगतस्यकार्यस्यचबीजादिरूपकार्यस्यचविवेचितत्वा
त् असंभवबीजत्वावच्छिन्ननिरूपितकार्यताकत्वेनोक्तत्वात् कार्यांतरमेवातीन्द्रियमित्यादिपक्षेनापिसहकार्यमित्यादि

नोक्तंदूषणमुक्तस्यापिचैवमित्यादिदूषणमवतारयति अथेति अत्रुक्तेतियथाबीजस्यातीन्द्रियकार्यांतरंबीजभिन्नंत
दुपादानंचाक्लृप्तमेवकल्प्यतेतथातादृशोपादानबीजरूपसहकारिणोरेकसत्वेऽपरसत्वनियमोपिकल्प्यिष्यतेइत्यर्थः
तथाचतयोरेकतरविरहस्थलेऽन्यस्मात्कार्यजननेव्यभिचारात्तत्कारणत्वानिर्वाहइत्यादिदूषणमनवकाशमितिभावः मूले
प्रयोजकःस्वभावइति अंकुरादिजनकतावच्छेदकःकुर्वद्रूपत्वरूपबीजस्वभावइत्यर्थः नान्वयव्यतिरेकगोचरःनान्वयव्यति
रेकग्रहविषयःतद्गोचरःअन्वयादिग्रहविषयोबीजत्वादिःनप्रयोजकःनांकुरादिकार्यप्रयोजकःदृश्यकार्यमंकुरादिअदृश्य
स्वभावेनांतीन्द्रियेणकुर्वद्रूपत्वेनक्रियतेसंपाद्यतेदृश्येनप्रत्यक्षसिद्धबीजत्वेनादृश्यमतीन्द्रियकार्यांतरंक्रियतइत्यनुषज्यते
सोयंएतत्स्वीकर्त्तासौगतःइत्यस्यइत्यादिवाक्यस्यविषयःअत्रंप्रामाणिकमुपेक्ष्यअत्रस्यनिर्युक्तिकवल्गनःकल्पनायाम
तिनिर्वेधात् तदेववाक्यंदर्शयति विहत्तौयोअत्रवाणिपरिस्फुरतिसहकारिविरहप्रयुक्तकार्यानुपधानरूपवक्ष्यमाणसाध्य
स्यपरमतेक्वचिदपिनसिद्धिरित्यन्वयदृष्टांतासंपत्तेःमूलेव्यतिरेकेणप्रयोगादृतिपरेरसत्प्रतियोगिकाभावस्यापिसतीत्यप

गमान्नवस्यमाणव्यतिरेक्युदाहरणसंगतिरितिभावः फलोपहितबीजेयदिसहकारिविरहप्रयुक्तकार्योपधानाभावरूपसा
ध्यस्यबाधःस्यात्तदातद्व्यावर्त्तकतयाविवादाध्यासितमितिसार्थकंस्यात्तदेवनतत्रापितादृशसाध्यवतायाउपपादनीयत्वा
दितितस्यस्वरूपाख्यानपरतामाह विवादेतिस्थैर्यपक्षेस्थैर्यवादिनोनैयायिकस्यमतेफलोपहितस्यपूर्वकालेसहकारिसम
वधानेनोत्तरमंकुरोपधानवतोबीजस्यापिप्रकृसहकारिसमधानस्यतोकार्यवैकल्यात्तत्पूर्वकालीनसहकारिसमवधान
विरहप्रयुक्तकार्योपधानाभाववत्वात्प्रतिवादिसौगतमतेफलोपहितव्यक्तेःफलानुत्पादृशयामसत्वेनतदासाध्यासं
भवेपिनबाधःसाध्यस्यसंदिग्धत्वात् अंकुरात्मककार्यस्यैवप्रकृतत्वयाआदिपदप्रयोजनंदर्शयति आदिपदेनेति सामा
न्यव्याप्तिरितियःयत्कार्यान्वयव्यतिरेकानुविधेयस्यावच्छिन्नान्वयव्यतिरेकधर्मवत्यत्तत्सहकारिविरहप्रयुक्ततत्कार्यानुप
धानवत्इतियत्तदर्थघटितसाध्यसाधनकव्याप्तिरित्यर्थः विशेषव्याप्त्यवलंबनेबीजजातीयत्वमात्रस्यैवहेतुतासंभवेनहे
तोरुक्तांतविशेषणवैयर्थ्यप्रसंगात्सामान्यव्याप्तिरेवात्रादरइतिभावः हेतौबीजमात्रोपादानात्सामान्यव्याप्तिर्नघटत

इतिनत्रापिबीजपरोत्तरमारिपरंपूरयति एवंचेति ननुयत्तदर्थाननुगमेनसामान्यव्याप्यबलंवनासंभवइत्यतआह
विशेषेति आरिपदमत्रसंपानाशंनमित्यारिः विशेषव्याप्तिपक्षेहेतुघटकतदुत्पत्तौनत्परस्यनकार्यसामान्यपरत्वसंभव
इत्यतआह हेतौचेति एतत्पक्षेहेतौभस्तांतविशेषणवैयर्थ्यमुद्धरति वैकल्यिकंचेति सहकारिविरहितंकुसूलस्थबीजा
दिकंनतदुत्पत्तिनिश्चयविषयः ननुतत्कार्योपधानानिश्चयस्य तद्योग्यतानिश्चयस्यवाविषयःपरेषांतत्रविवादात्तथा
चतदुत्पत्तिनिश्चयविषयोयद्बीजजातीयंतत्वंहेतुरसिद्धइतिभावः ननुतदुत्पत्तिनिश्चयविषयोयद्बीजंतज्जातीयत्वं
हेतुःएवंचतन्निश्चयविषयसहकारिसमवहितबीजजातीयत्वंसर्वत्रैवबीजेऽभ्यसिद्धमित्याशंक्यकारणतावच्छेदकरू
पेणसाजात्यंविवक्षितंयेनकेनापिरूपेणवाद्वयमपिदृष्टमित्याह कारणतावच्छेदकेति तत्साजात्यंकुसूलस्थबीजेकुर्वद्रूप
बीजसाजात्यंअसिद्धमितिपरैरकुर्वद्रूपसाधारणरूपस्यकारणतावच्छेदकत्वानुपगमारिनिभावः रूपांतरेणकिंचिद्रूपेणअ
तिप्रसक्तमितिसाध्यशून्यशिलाशकलारिसाधारणंतस्यापिद्रव्यत्वारिनाकुर्वद्रूपबीजसजातीयत्वारिनिभावः तदुत्पत्ति

तदुत्पत्तिपदेनतन्निश्चायकेतितत्कारणतारूपतदुत्पत्तिनिश्चायकेत्यर्थः उपलक्षितौविवक्षितौनयाचतत्कारणत्ता
ग्राहकान्वयव्यतिरेकनिश्चयविषयतावच्छेदकरूपवत्वंपर्यवसितं तादृशंचबीजत्वारिकमितिभावः द्रव्यत्वारिनाप्यं
कुराद्यन्वयव्यतिरेकानुविधेयान्वयव्यतिरेकप्रतियोगित्वनिश्चयसंभवादतिप्रसक्तेर्वारणायप्रमारूपनिश्चयोविवक्ष
णीयःतत्प्रमात्वंचतद्धर्मोमितिज्ञानविषयत्वनिवेशेऽनतिप्रयोजनकइत्याशयेनतत्परित्यज्यफलितार्थमाह नि
यतान्वयव्यतिरेकेति कार्यान्वयव्यतिरेकानुविधेयान्वयव्यतिरेकेत्यर्थः शिलाशकलस्यदृष्टांततानिर्वाहायतन्निष्ठां
कुरानुत्पादकत्वेसहकारिविरहप्रयुक्तत्वाभावंव्यवस्थापयति शिलादाविति सहकारिसाकल्येपिस्थितिसलिलारिस
मवधानेपितदंकुरानुपधानंजरादहनारिनिव्याचष्टे शिलाशकलारिति तथाचशिलाशकलादुत्पन्नरूपबीजत्वात्मक
साधनव्यावृत्तिःशिलाशकलेतादृशसाधनासत्वमितियावत्किमुक्तसाध्यव्यावृत्तेःसहकारिविरहप्रयुक्तकार्यानुपधान
रूपसाध्यस्यशिलाशकलेऽसत्वप्रयुक्तंवेतिमूलार्थः एतत्पक्षेबीजेतादृशसाध्यासत्वेऽक्तहेतुसत्वानिर्वाहाद्धेतोर्ना

प्रयोजकत्वं द्वितीयपक्षे द्वितीयेशिलाशकलस्य तादृशबीजत्वरूपहेतुसमवधानविरहे कुरं प्रति तत्प्रयोजकपरंपरोन
र्गतबीजं वा प्रति यत्सामर्थ्यं तद्विरहस्य प्रयोजकत्वमिति पक्षे साक्षात्परंपरया वा अंकुरजननेसमर्थेषु कुसूलस्थबीजे
षु सहकारिविरहप्रयुक्तकार्यानुपधानरूपसाध्यमंतरेणापि न तादृशबीजत्वरूपहेतुसत्वनिर्वाहः उपदर्शितसामर्थ्यवि
रहस्यैव तदभावप्रयोजकत्वेन तादृशसाध्याभावस्य तदभावाप्रयोजकत्वादिति दर्शितपक्षद्वयसंदेहेनाहेतावप्रयोज
कत्वसंदेहं दर्शयति तथा चेति सामर्थ्यविहोरे रितीत्यनंतरं व्यतिरेकसंदेहं दर्शयन्नोपात्तस्य व्यतिरेकस्य संबंधिनं दू
रयति हेतोरिति व्यतिरेकस्येति व्याचष्टे विपक्षत्वव्यावृत्तत्वस्येति साध्यव्यापकत्वस्येत्यर्थः प्रागेवेत्यनंतरं व्यभिचारशं
कनिराकरणप्रकारंतराकांक्षाशांतये पूरयति बीजत्वस्येति अंकुरप्रयोजकत्वं अंकुरजनकतावच्छेदकत्वं तद्व्यवस्था
पने स्वरूपयोग्यतावच्छेदकरूपाक्रांते सहकारिविरहप्रयुक्तकार्यानुपधानरूपसाध्याभावणैकाया अयोगादिति भा
वः परमते जातिरपारमार्थिकी नितन्मतमालंब्य बीजत्वजातिपुरस्कारेण कारणत्वमाक्षिपति स्यादेतदिति अतद्व्या

वृत्तिरूपं अबीजभेदरूपं व्यावृत्तित्वात् अभावत्वात् असदलीकं न चेति संभवति इत्यनेनान्वितं असतः अलीकस्य सत्ता
पारमार्थिकेण बीजेन स्वलक्षणेनेति बीजत्वस्यासत्वेन स्वाव्यावर्त्तकत्वेपि स्वतएव व्यावृत्तेनेत्यर्थः कारणीभूतबीजे
बीजत्वं संबंधासत्वे किमनिष्टमित्याकांक्षायामाह न च कारणेनेति अवच्छेद्यासमानाधिकरणस्यानवच्छेदकत्वादि
तिभावः एवं सति तुल्ययुक्त्या कुर्वद्रूपत्वे जातिरपि भवतां कारणतावच्छेदिका न स्यादिति शंकते अथैवमिति अंकुरत्वाद्य
वच्छिन्नोत्पत्तिनियमायैव तदवच्छिन्नकारणतावच्छेदकतया कुर्वद्रूपत्वकल्पनं जातेरलीकत्वे अंकुरत्वाद्यवच्छिन्नोत्पत्ता
वप्यलीकतया तादृशकार्यकारणभावएव नास्ति किमर्थं तज्जातिकल्पनमित्याह कुतश्चेति अंकुराद्यर्थिनो बीजादौ प्रव
र्त्तिर्बीजत्वादिना अंकुरादिरूपकारणत्वं विना कथमुपपादनीयेत्याह न तद्व्यक्तीति कुर्वद्रूपत्वस्यैतेन रूपेण कारणत्वस्य
चाकल्पनेदृष्टापत्त्यासमाधत्ते सत्यमिति स्वकारणेति स्वकारणसामर्थ्यानिश्चयः स्वकारणस्यानिश्चयिनेसामर्थ्येनेनभा
सारिनंजपपादितः स्वभावविशेषः अविलंबितफलजननस्वभावो यस्य तथाभूतजन्यमानएव स्वकार्यं कुर्वाणः सालिकोभा

वः कुर्वद्रूपदर्शनेऽस्यर्थः ननु कार्यजनकतावच्छेदकजातिविशेषयोगेन तथाभिधीयतइति शेषः नन्वेवं जनकतावच्छेदकध
र्मविशेषरूपयोग्यतात्मकसामर्थ्यनदभावरूपविरुद्धधर्माध्यासाभावात्कुसूलस्थक्षेत्रस्थयोरभेदसंभवेन कुतः क्षणिकत्वसि
द्धिरित्यतआह क्षणिकत्वं चेति करणाकरणेतिक्षेत्रस्थैकरणं कुसूलस्थैचाकरणं तयोर्भावाभावरूपतया विरोधादित्यर्थः सा
मान्यरूपेण बीजादीनामहेतुत्वे लोकयात्राविरोधप्रसंगमुद्धरति लौकिकस्तु व्यवहारइति अंकुराद्यर्थिलोकानां बीजादौ प्रवृत्ति
रित्यर्थः विकल्पवासनावशात् सविकल्पकजन्यसंस्कारप्रवाहवशात् कल्पितैरिति कल्पनाऽसत्ख्यातिस्तत्याविषयीकृतैरित्य
र्थः असद्विषयेइंद्रिया— यभावेनानादिवासनायास्तत्ख्यातिहेतुताबोध्याऽनुगतरूपे बीजत्वादिरूपावच्छेदेन कार्यकार
णभावस्यापि कल्पनादिति एवं च कार्यकारणभावकल्पनाविषयस्यानुगतबीजत्वादिधर्मविशिष्टस्यासत्त्वादनुगतधर्म
प्रकारेणप्रवृत्तिविषयतानत्रैवस्थलसणस्यानयनादिनिर्वाहः मणिप्रभायां मणिभ्रमेण प्रवृत्तौ मण्यानयनादिवत्समाधत्ते
मैवमिति तादृशेति करणाकरणरूपेत्यर्थः निरसनीयत्वादिति तयोः कालभेदेनाविरोधं व्यवस्थाप्येत्यादिः तथा च सामर्थ्या

५५

सामर्थ्यरूपविरुद्धधर्माध्यासस्यैव भेदकतायाउपगतत्वात्प्रभावेनस्याप्यसिद्धानतत्क्षणिकत्वसिद्धिरिति भा
वः ननु तत्तद्व्यक्तिविश्रांतकारणतावच्छेदकधर्मएव सामर्थ्यं तत्तदभावरूपविरुद्धधर्माध्यासादेव क्षेत्रस्थकुसूलस्थयोर्भेदः
सिध्येत कुसूलस्थस्य तादृशकारणाभावकरणात्तदुपपत्तये कुसूलस्थे तादृशसामर्थ्योपगमासंभवादित्यतआहापाकरणीयत्वा
च्चेति बाधकानामित्यग्रिमेणसंबध्यते सामान्यादिषु बीजत्वांकुरत्वादिषु बाधकानामित्यस्य पारमार्थिकत्वादित्यादिः तथा च
न तेषां कार्यकारणभावावच्छेदकत्वानुपपत्तिरिति भावः मूले विरुद्धधर्माध्यासइति कुसूलस्थस्यापि बीजत्वेन सामर्थ्य
मिति सामर्थ्यस्य तत्रासत्वादिति शेषः प्रयोजकं अंकुरकारणतावच्छेदकं अन्वयव्यतिरेकग्रहः प्रकारत्वादिति शेषः सहका
रिसमवधाने सति कर्तृस्वभावत्वं सहकारिसमवधानसहितसामर्थ्यस्य प्रयोज्यं कार्यं करणेतरसन्निधानेऽकरणं सहकार्यस
न्निधानप्रयोज्यं समर्थस्याकरणं तज्जातीयमात्रएवेति बीजजातीययोर्विभिन्नव्यक्त्योरेवेत्यर्थः इयं व्यवस्थेति व्याचष्टे वि
रुद्धौ इयमिति मूले एकस्यां व्यक्तौ विनिरयं व्यवस्थेत्यनुषज्यते करणाकरणलक्षणेति तत्र तयोः कुसूलस्थक्षेत्रस्थ बीजयो

THE ASIATIC SOCIETY OF BOMBAY
(Established in 1804) Town Hall, Bombay-400 023
+-Jmtec

विरुद्धकरणाकरणसंसर्गस्यप्रत्यक्षसिद्धतयेत्यर्थः दुर्वारत्वादिति करणाकरणवत्तदुभयव्यक्तिभेदस्येत्यादिः सदृशस्य
प्रक्रांतविरोधापरामर्शकत्वेपुद्भिंगानानस्यादिति व्याचष्टे विरुद्धौसविरोधइति नित्यत्वानित्यत्वयोःसदातनत्वप्रागभा
वप्रतियोगित्वरूपत्वेपरस्पराभावरूपत्वाविरहेणदृष्टांतताविरोधात्तद्व्याचष्टे इहेति नित्यत्वं ध्वंसाप्रतियोगि
त्वमनित्यत्वं च ध्वंसप्रतियोगित्वमित्यर्थः तदापारकत्वमिति व्याचष्टे तस्यपरस्परविरहस्यापादकत्वमिति आपादकत्वमा
पतियोग्यत्वमित्याशयेनाह तद्व्याप्यतयेति परस्पराभावव्याप्यत्वात्मकमित्यर्थः तद्वत्तोव्याचष्टे परस्परभेदवतेति एकस्मि
न्परभेदइत्यर्थः परस्पराभावरूपत्वेअत्यंताभावस्यैवप्रवेशेनप्रक्रांततयातद्वतेसत्रतत्परेनकृयंभेदःपरामर्शनीयइत्य
तआह भावत्वेनेति तात्पर्यवशेनएवमभावपदेनात्यंताभावत्वप्रकारकबोधजननात्स्मारितत्वेनेति पूर्ववाक्यजन्यशब्द
बोधविषयस्यैवप्रक्रांतत्वमित्याशयवतोव्याख्यामुपन्यस्यति तद्वतेति परस्परमितिस्वात्यंताभाववतस्तस्यस्वस्मिन्नत्यंताभा
ववत्तास्वस्यतद्विरोधइत्यर्थः दृष्टांतेईरणविरोधंघटयति दंडित्वइति अकरणेकरणात्यंताभावसत्वेपिकरणेःकरणात्यं

नाभावस्यकरणस्यासत्वात् प्रहृतेएतादृशविरोधाप्रसक्तिरेतन्मतेःस्वरसबीजं निर्विशेषणस्येति व्याचष्टे कार्यविशेषानि
यंत्रितस्येति विशेष्यंपरयति अकरणस्येति कार्यविशेषनियंत्रितत्वंकार्यविशेषाविशेषितप्रतियोगिकत्वंतथाचनिर्वि
शेषणंअकरणंकरणसामान्याभावइतिफलितं अवस्तुनिअकरणस्यपरेषांसिद्धत्वात् असिद्धेरित्यत्राधिकरणंपरयति
वस्तुनीति वस्तुमात्रइत्यर्थः स्थिरेवस्तुनिसर्वदैवकिंचित्करणमित्यनियमेनस्थिरपक्षेकुत्रचित्करणसामान्याभावःसिद्ध
एवेतिक्षणभंगवादिनामित्यक्तं परमतेःकरणासिद्धिंस्फुटयति यावत्सत्वमिति किंचित्करणात्तज्जन्यबीजादिकरणा
त् असमन्मतेस्थिरेवस्तुन्यकरणस्यसिद्धतयाकरणाकरणयोर्विरोधःसिध्येदित्यतआहास्माकमिति तत्सिद्धावप्यकरणसि
द्धावपिकालभेदादेवकालभेदेनोभयोरेकत्रसत्वेबाधकविरहादेवतदुभयमतएवाकरणस्यवस्तुमात्रेःसिद्धत्वमुपपादयतो
मतमाह यत्तिति जननसंभवादिति अकरणस्यासिद्धतयानविरोधसिद्धिरितिशेषः तथात्वसंभावनायामितियावत्सत्वंसंयो
गादिस्वध्वंसान्यतरजनकत्वसंभावनायामित्यर्थः नित्यमात्रस्येतिमात्रपदेनतत्मार्थकंनित्यस्यमहाप्रलयेपिसत्वात्तदानी

चकार्यानुत्पत्तेरितिभावः बीजमात्रमधिकृत्येदमितिबीजमात्रेमतद्वयेऽकरणासिद्ध्यभिप्रायेणासिद्धेरित्युक्तमित्यर्थः
बीजेतदसिद्धावन्यत्रतत्सिद्धाविरोधसिद्धिसंभवात्अत्रास्वरसःसविशेषणस्यविरोधसिद्धावपीतिमूलंयथाश्रुतमसं
गतंतत्कार्याकरणाकरणयोःकालभेदेनैकत्रसत्त्वोपगमेनविरोधासिद्धेरेकत्रतदुभयाध्यासोपगमाच्चेत्सतएककालाव
च्छिन्नत्वाविशेषितयोरेकत्राध्यासउपगम्यतेतादृशयोरविरोधएव तादृशयोरविरोधेपितद्विशेषितयोर्विरोधःसिद्धः
तादृशयोर्नैकत्राध्यासइत्यर्थपरतयामूलंसंगमयति तत्कार्येतिस्वरूपतइतिविशेषणांतरानवच्छिन्नयोरित्यर्थः
कालभेदेनद्वयोरेकदेशेवृत्तावविरोधे देशभेदेनतयोरेककालेवृत्तावविरोधंदृष्टांततयादर्शयति एकस्मिन्कालइति
देशभेदेनैवेतितदनधिकरणदेशावच्छेदेनेत्यर्थः वृत्तिरित्यग्रिमेणास्यसंबंधःप्रकृतमाह एकस्मिन्धर्मिणीतिवृत्ते
र्दुरपन्नत्वात्रितियोजनातस्यादुरपन्नत्वेहेतुरनुभवसिद्धतयोत्पत्तोनुभवसिद्धत्वात्तदीयत्वलाभः एककालावच्छेदे
नेतिअंकुरकरणाकरणयोरित्यनुषज्यतेविरोधइतिचतुर्थीयाविशेषणेतथाचैककालावच्छिन्नयोरंकुरकरणाकरणा

योर्विरोधइत्यर्थः सविशेषणस्येतिव्याचष्टे कार्यविशेषविशेषितस्येति अकरणेकार्यस्यविशेषणत्वंप्रतियोगिद्वा
रा विरोधसिद्धावित्यत्रपूरयति एककालावच्छेदेनेति एककालावच्छिन्नस्येत्यर्थः अध्यासानुपपत्तेरितिव्याचष्टे
अध्यासस्येत्यादिः एकधर्मिसमावेशस्यएकत्वेनाभ्युपगतेधर्मिणितदुभयसंबंधस्यानुपपत्तेरितियथाश्रुतमसंगतंध
र्मिणएकत्वेऽनुपपन्नतयातद्भेदसाधकतासंगात् अतोव्याख्यातमनभ्युपगमादितितथाचतादृशधर्मिएवनभ्यु
पगतस्यतस्यनभेदसाधकतेतिभावः अतएवसमावेशमानिष्टामहइसंतेनानभ्युपगमएवमूलकृताविवृतःयदायद
कारणेहीत्यादेर्हियस्माद्यदायत्करणंयत्तत्तदातत्तत्करणस्याभावरूपंनत्वन्यदातत्करणस्याभावरूपंनहितदा
तत्करणतदातत्करणाभावयोरेकधर्मिणिसमावेशंस्वीकुर्महइतियथाश्रुतोर्थःसचनसंगच्छतेतत्कालीनतत्करणोयत्र
धर्मिणितत्रैवान्यदातदभावस्वीकारात् अतोयत्रतत्रइतिपूरयित्वान्यथाव्याचष्टे यदाहीति यदायत्कालावच्छिन्नंप
त्रधर्मिणियत्कार्याकरणंतदातत्कार्यकरणस्यतत्कालावच्छिन्नतत्कार्यकरणस्यतत्रधर्मिणिअभावपरमसत्वार्थक

तयाव्याचष्टे तद्धर्मिरहितत्वाभावइतिएतावतातत्कालावच्छिन्नतत्करणतत्कालावच्छिन्नतत्करणयोरेकधर्मिरहित
त्वरूपविरोधप्रदर्शनंअतएवाभावपदस्ययथाश्रुतार्थपरित्यागःतदधिकरणेतदभावस्यतदुभयविरोधानात्मकत्वात्
अभावपदस्ययथाश्रुतार्थकत्वेनत्वन्यदेत्यादिमूलासंगतिश्चतत्कालावच्छिन्नाकरणधर्मिणिअन्यकालावच्छिन्नक
रणस्याभावसत्त्वेनतत्प्रतिक्षेपायोगात् नत्वन्यदेत्यादेर्विभिन्नकालावच्छिन्नयोरविरोधप्रदर्शनपरताप्रकाशनाय
व्याचष्टे नत्वन्यदेति अन्यदाअन्यकालावच्छिन्नस्यानुषज्यमानस्यतत्राभावइत्यस्यार्थमाह तद्धर्मिरहितत्वाभाव
इतिभिन्नकालावच्छिन्नयोःकरणाकरणयोरेकधर्मिण्यभ्युपगतत्वात्तदविरोधःप्रदर्शितःतयोरपिविरोधेधर्मिभेद
स्यदुर्वारत्वात्विरुद्धयोःकरणाकरणयोरेकधर्मिण्यनभ्युपगमपरेनचैतयोरित्यादिमूलेएतयोरितियदुक्तंतद्व्याख्या
एककालावच्छिन्नतत्कार्यकरणाकरणयोरितिपरस्पराभावापादकत्वरूपःकरणाकरणयोर्विरोधस्तयोर्भावाभावरू
पतयाभावाभावेत्यादिनातद्दूषणंनघटतेपरस्पराभावापादकत्वस्यपरस्पराभावापाद्यकत्वपर्यवसितस्याभेदेपिसं

DR. BHAU DAJI MEMORIAL

भवादतोव्याप्तेर्भेदगर्भताभिप्रायकत्वायातत्संगमयतिअभेदइतिआक्षेप्याक्षेपभावेतिभेदगर्भव्याप्यव्यापकभावेत्यर्थः मू
लेव्यापारापरव्यपदेशसहकारीतिव्यापारइतिअपरव्यपदेशोनामोतरंयस्यतादृशःसहकारीत्यर्थःतद्भावाभावौतन्मात्र
मात्रौतत्समवधानासमवधानेइतियावत्कार्यस्यपूर्वकालेचरमव्यापारसमवधानसंभवात् व्यापारसमवधानासमव
धानयोःकरणाकरणरूपत्वासंभवात् तन्यदंचरमव्यापारार्थकतयाव्याचष्टे विदन्तोचरमेतियत्समवधानानंतरमेवकार्यो
त्पत्तिस्सएवचरमःतादृशव्यापारसमवधानंचकार्याव्यवहितप्राक्क्षणएवमूलेकार्यभावाभावाविनिर्भूतेतरक्षणेकार्यला
भालाभावित्यर्थः कार्याव्यवहितप्राक्क्षणसंबंधतदसंबंधावितियावत्सहकार्यंतपदार्थव्याख्यायकरणाकरणयोरुक्तरू
पतयाभावाभावरूपतास्फुटीकरणायोक्तरूपयोर्भावाभावरूपतांप्रश्नयन्समुदायार्थमाह हियस्मादितिएतावेतौवेतिचरमव्या
पारलाभालाभौकार्यभावाभावौवेत्यर्थः करणाभावातिरिक्तेति करणाभावातिरिक्तकरणक्षणभिन्नक्षणसंबंधस्येत्यर्थः
त्वकालएवेत्यादिमूलंकरणंयथास्वकालएवस्वाभावरूपाकरणप्रतिक्षेपरूपंतथास्वाभावातिरिक्तस्याप्यकरणस्ययोऽभा

वस्तुस्यापि स्वकाल एवास्तेपकं न तु स्वानधिकरणकाल इत्यर्थः तथा च करणकालातिरिक्तकाले करणाधर्मिण्यप्यक
रणेन विरुद्धमिति भावः एतदेव दृढयति नहीति विद्यत्तावन्यदेत्यस्य व्याख्या स्वानधिकरणकाल इति स्वाभावं प्रतिक्षे
तुमर्हतीत्यस्य स्वाभावप्रतिक्षेपं संपादयितुमर्हतीति यथा श्रुतो योऽसंगतः स्वस्य स्वाभावप्रतिक्षेपसंपादकत्वाप्रसक्तेरतो
व्याचष्टे प्रतिक्षेपात्मीभवितुमिति प्रतिक्षेपस्वरूपीभवितुमित्यर्थः स्वस्य स्वाभावप्रतिक्षेपसंपादकत्वायोगं स्फुटयति अ
भावाभावस्येति स्वाभावः विरोध्यभावमित्यत्र कर्मधारयभ्रमनिरासाय व्याचष्टे विरोधिन इति स्वविरोधिनः अकरणस्येत्यर्थः
मूले आस्तेतुमिति अपक्षधर्मोपि व्याप्यतामात्रेणासाधयितुमित्यर्थः नकदाचिदपितन्नस्यादित्यन्वयिनस्तथासतीत्यस्या
न्यदोस्त्वविरोध्यभावास्तेपइत्यर्थकत्वासंभवात्तादृशं तद्व्याचष्टे विद्यत्तोस्त्वासत्वकालेपि स्वाभावप्रतिक्षेप इति न कदाचि
दपितन्नस्यादित्यस्य सर्वदा तदभावासत्वप्रसंगपरतानमुज्यते अन्यदास्वाभावप्रतिक्षेपस्य सर्वकालांतर्गतस्वाधिकरण
कालेऽर्थकत्वायोगादतो व्याचष्टे तदापीति स्वानधिकरणकालेपीत्यर्थः स्वाभावप्रतिक्षेपः स्वाभावाभाव एव तस्य तादृशे ५९
१ पा

णपाघापादकभावो न संभवतीत्याशंक्य स एव स्यादिति न चेत्यादि द्वितीयापाद्ये अनुपज्यमानस्य तथासतीत्यस्यान्यदा
निराकरणीये करणाभावास्तेपे आपादकपरतां स्फुटयितुं तदर्थं व्याचष्टे स्वविरोधिनोऽभावास्तेपइति अकरणस्य कर
णाभावातिरिक्तताया अभ्यपगततया अतिरेके पितस्य करणाभाववत्करणविरोधितया स्वविरोधिपदेनैव तान्निर्दिष्टं
नत्वकरणपदेन करणाभावस्यापि बोधनात् अतएव मूलकृतापि विरोध्यभावं वेत्यत्र तद्विरोधीभावेदित्यत्र च विरोधिपरमे
वोपात्तं अभावास्तेपेऽभावसाधने मूले इत्यायासमिति एतत्सत्कार्यवादिनां सांख्यानां मतमेव स्वीकृतं स्यादित्यर्थः एक
दा करणस्यान्यदापि स्वाभावप्रतिक्षेपकत्वे स्वविरोध्यभावास्तेपकत्वे वा तुल्ययुक्तयावस्तुमात्रस्यैव तथात्वे एकदा सकलसर्व
दैव स्वस्य स्वीकरणीयत्वादिति भावः न वा विरोधः करणाकरणयोः सिध्येदिति शेषः विरोधिन एवासिध्येदिति भावः ननु कर
णासत्वकाले करणविरोधिनो भावेपि करणानधिकरणदेशे विरोधी न सिध्येदित्याशंकां निराकरोति विद्यत्तोस्त्वासत्वकालेपी
ति मूले एवं वक्तुमिति एककालावच्छिन्नस्यैव परिमाणद्वयस्य विरोध इति वक्तुमित्यर्थः तथा च ययोरभेदः प्रसाध्यते

तयोरपियत्रापदृष्टोत्कृष्टपरिमाणोपलंभस्तत्राश्रयभेदोभ्यपेयतेपरिमाणद्वयस्यकालभेदेनाप्येकत्रासंभवात् अभेदप्र
त्ययस्यचव्यक्त्यभेदावगाहित्वेभ्रमत्वमेवप्रमात्मकस्यचतस्यतज्जातीयाभेदोविषयइतिसिद्धांतोभज्येतेतिभावः काल
भेदस्यतत्राविवक्षितत्वादितिकालभेदेनाविरोधस्यपरिमाणयोर्वक्तुमशक्यत्वादित्यर्थः बाधकमाह तथाहीतिशरीरा
दौभोजनादिनाऽवयवोपचयाद्यत्रपूर्वपरिमाणापेक्षयामदृष्टंपरिमाणमुपलभ्यतेतत्रपूर्वजातद्रव्यावयवेद्रव्यांतर
स्यानारंभकसंयोगाःनमदृष्टपरिमाणभेदप्रयोजकाः संयुक्तद्रव्याणामवयवत्वविरहेणावयवबाहुल्यविरहात् अतोद्र
व्यांतरसंयोगानामारंभकत्वमुपगंतव्यंतेषांचनजातद्रव्यारंभकत्वमसंभवात् अतोमिलितेषुतावदवयवेषुद्रव्यांतरा
रंभकउपगंतव्यःसताबन्नसंभवतिमूर्त्तद्वयस्यैकदैकत्रासत्वादित्याह नारब्धद्रव्यैरितिआरब्धद्रव्यैरपिपूर्वद्रव्यना
शेद्रव्यांतरारंभाविरोधात्तत्वदंव्याचष्टेआरब्धद्रव्यवद्भिरितिवर्त्तमानसंबंधोमतुबर्थः एकदेशस्यविरोधेऽन्वयेविव
क्षणीयार्थलाभासंभवइत्यतआह एकदेशीतिफलतःअर्थतःसमानदेशतेत्यस्ययत्रमूर्त्तत्वंतत्रस्यसमवायितावछे

दकसणावच्छिन्नस्वसमवायिनिष्ठस्वभिन्नमूर्त्तसमवायिताकंयत्तदन्यत्वमितिव्याप्तेरितिसमुदायार्थः तादृशंस्वंगुणादिक
मेकगुणितेनएकेनैवतंतुनायत्रपटारंभस्तत्रावयवावयविनोःसंयोगविरहेणतत्तंत्वारंभकांशूनामेवमिथःसंयोगाः
असमवायिकारणाःनिर्वाच्याःतादृशसंयोगानांचकार्यसामानाधिकरण्यानुरोधात्तंतुमदंशुषुपटसमवायःस्वीकार्य
इतितंतुनापटस्यैकदासमानदेशत्वान्नोक्तनियमइत्याशंक्यनिराकरोति नचेतितथात्वायोगात्पटसमवायित्वायो
गात् अथैवंतत्रकथंपटप्रत्ययइत्यतआह वेमाद्यभिघातेनेतिखंडतंतुभ्यइतिखंडतंतूनामुत्पादेनतत्तंत्वंश्वावच्छेदेनते
षांसंयोगसंभवात्तत्संयोगानामेवासमवायिकारणत्वादितिभावः तंत्वविनाशस्थलेपटएवनोत्पद्यतेतंतावेवपटत्वभ्र
मइत्याह अन्यथेतितंत्वविनाशइत्यर्थः अवयवावयविसंयोगमुपगम्यतत्रतंत्वंशुसंयोगात्तत्रतंतावेवपटोत्पत्तिरिति
वदतामेकदेशिनांमतमाह अवयवांतरावच्छेदेनेति स्वभिन्नावयवावच्छेदेनेत्यर्थः प्रत्ययादितिपाणौपाणिभिन्नशि
रोरूपशरीरावच्छेदेनशरीरसंयोगस्यदुरपन्हवत्वादितिशेषः तथाचेतिअंशाविति शेषः तंतुरेवेतिएकोपीत्यादितंतुत्वेन

पटंप्रतिनातादात्म्यसंबंधेनहेतुतयानंतुभिन्नेंशौपटोत्पत्त्यसंभवादितिभावः मूलेआरंभेपूर्वद्रव्यनिवृत्तिरितिएकःपक्षः
अनिवृत्तावनारंभइत्यपरः उक्तनियममनादृत्यपूर्वद्रव्यसत्वएवचयद्द्रव्यांतरारंभउपेयतेतदाहोपांतरमाहविवृत्तौ
पूर्वद्रव्यसत्वइतिएकधर्मिसमावेशइतिअपकृष्टपरिमाणवतिपूर्वद्रव्येउत्कृष्टपरिमाणस्यासत्वादितिभावः पूर्वद्रव्य
एवेतिअत्यावयवारभ्येपीत्यादिःपरिमाणांतरोत्पत्तौअनारंभकारपिद्रव्यांतरसंयोगात्प्रकृष्टपरिमाणोत्पत्तिस्वीका
रेद्रव्यांतरोत्पादाभ्यपगमवैयर्थ्यमितिद्रव्यांतरोत्पादानभ्यपगमेपिनेषपक्षःसाधुरितिदर्शयिष्यते प्रथमपक्षेपरिमा
णसमावेशानुपपत्तिमाह मूलेनचेति आश्रयभेदादेवेतिविनष्टद्रव्येपरिमाणोत्तरोत्पत्त्यसंभवेनपरिमाणांतरशून्ये
उत्तरद्रव्यएवतस्याःस्वीकरणीयत्वादितिभावः उत्तरपक्षेपिदूषणमाहानिवृत्ताविति संयोगिद्रव्यांतरानुपचयइतिपू
र्वद्रव्यावयवेद्रव्यांतराणामसंयोगेइत्यर्थः तदुपचयेत्विति तुरप्यर्थेआश्रयानुपपत्तेरितिपूर्वमूर्त्तविरोधेनतदवयवसं
तर्भाव्यसंयुक्तद्रव्यांतरेप्रकृष्टपरिमाणाश्रयत्वेनाभिमतस्यमूर्त्तस्यानुत्पत्तेरित्यर्थः विवृतौएतेनेतिद्रव्यांतरविशिष्टद्र

व्यांतरोत्पादासंभवेनेत्यर्थः आरभ्यारंभकवादानुसरणमितिअवयविद्रव्याणामवयवावयवपरंपरास्वपिसमवायः
परमाण्वादिभिर्द्व्यणुकादिकमारभ्यत्रसरेण्वादीनामप्यारंभात्नचतत्रतत्समवायेमानाभावःअंशौपटःकपालि
कायांघटइत्यादिप्रत्ययानामसिद्धत्वादितिवाच्यं तदनभ्यपगमेजांबूनदनिर्मितावयविविषयकदानादिनातदवयव
परंपरायांस्वत्वादिजननार्थंस्वविषयसमवायस्वविषयसमवायिसमवायादिरूपासंख्याननुगतपरंपरासंबंधेर्हीना
दीनांस्वत्वहेतुतानांकल्पनीयतयामहागौरवात् अवयवावयवेषुसमवायोपगमेस्वविषयसमवायादिरूपैकसंबंधेन
तत्रतद्धेतुतयैवनिर्वाहात् एवंयत्रघटाद्यारंभकसर्वद्व्यणुकानांयुगपद्विनाशस्तत्रत्रसरेण्वादिनाशक्रमेणानंतक्षण
नंतरमेवघटादेर्विनाशस्योपगंतव्यतयातावत्क्षणपर्यंतंघटादेरवस्थानेनंतर्यानंतसंयोगविभागाद्युत्पत्तिकल्प
नागौरवंआरभ्यारंभकवादिमतेद्व्यणुकनाशात्स्वमतियोगिसमवेतत्वसंबंधेनत्रसरेण्वादिघटपर्यंतप्रत्यासन्नात्यु
गपदेवत्रसरेण्वादिघटपर्यंतस्यविनाशान्नतावत्क्षणेघटावस्थानं एवंसिद्धांतिमतेयत्रावयवावयवक्रियायातेनसह

चक्रारिसंयोगादवयवेतत्संयोगः ननश्चावयविनिउक्तक्रमेणैवावयवावयविचाक्षुषारिकमितिस्थानभेदस्तत्र
तन्मतेअवयवावयवचक्रारिसंयोगस्यावयविन्यपिसामानाधिकरण्यसंबंधेनप्रत्यासन्नतयातत्रैवयवावयवि
नोर्युगपदेवचक्रारिसंयोगस्तत्रचेतद्द्वयोरेकमेकंतानमितिलाघवमितिप्रक्रमित्यर्थः नचावयवावयविभावाना
पन्नयोरेवमस्तीयोरेकदाएकसमवेतत्वंनेष्यतेननुअवयवावयविनोरपिनदुपगमेसतिविरहारितिवाच्यंघटादिम
तिघटाद्यंतरातुत्पत्त्याद्रव्यंप्रतिसमवायेनद्रव्यस्यप्रतिबंधकतायाआवश्यकतयाअवयवावयवेसंतावयवरूपद्र
व्येनप्रतिबंधादवयविनस्तत्रोत्पत्त्यसंभवात्एवंघटादौकपालत्वादिनाहेतुतयाकपालादिभिन्नकपालिकादौघटा
देरुत्पत्त्यसंभवाच्चपरिसंयोगादौकमीदीनामिक्कार्यतावच्छेदकाक्रांतसकलव्यक्तीनामधिकरणदेशेअव्यवहितप्रा
कृक्षणावच्छेदेनकरणतावच्छेदकावच्छिन्नसत्वमेवकारणताघटकंननुसर्वाधिकरणेतादृशंसत्वमित्यच्यतेतत्रद्रव्यत्वा
वच्छिन्नाभावादेर्घटाद्युत्पत्तिरर्वकालेकपालिकादावसत्वेपिकपालादौसत्वेनैवकारणतानिर्वहतिकपालिकादौकपा

लाद्युत्पत्त्यनंतरक्षणद्रवकपालाद्युत्पत्तिकालेउत्पन्नकपालादौघटादावुत्पन्नेवातत्कपालिकाद्यसमवेतकपालादौघटा
दौजायमानेतत्रघटाद्युत्पत्तिरनुगतकारणस्यनियामकतयानशक्यतेवारयितुं सर्वद्रव्यविरोधेनोक्तस्थलेतदवयवोतभा
वेनद्रव्यांतरानुत्पत्तावपिउत्पन्नेतद्द्रव्येपरिमाणंपराहतोबाधकाभावइत्याशंक्यनिराकरोतिनचेतिअनारंभकद्रव्यांतरोपच
यस्यपरिमाणनाशकतांनिराकरोतिपरिमाणस्येतिस्वाश्रयनाशपरमाश्रयनाशघटितसामग्रीपरंअत्रएकपदेनाश्र
यनाशघटितायाउक्तकारणघटितसामग्र्याःपरिमाणनाशकत्वव्यवच्छेदःउक्तस्यपरिमाणजननकतांखंडयति अवय
वमात्रसंयोगेतिअवयवेद्रव्यांतरसंयोगस्याप्यवयवसंयोगतयामात्रपदंसंयोगःप्रचयारिरूपःअवयवमात्रेतिबहुत्वे
नान्वितंआरिपदात्प्रहृष्टावयवपरिमाणपरिग्रहःअत्राप्येतद्घटितसामग्रीविवक्षयाएभिरघटितायाउक्तसामग्र्याःप
रिमाणोत्पादकत्वस्यैवकारणत्वव्यवच्छेदःउक्तकारणघटितसामग्र्यंतरस्यपरिमाणादिनाशजनकत्वेगौरवमस्त्येवबाधकां
तरमप्याहान्यथेतिमस्तेद्रहापीतिकालभेदेनकरणाकरणयोरेकत्रसत्वेपीत्यर्थः किंवाअकमित्याकांक्षायामाहप्रसंग

विपर्ययोरुक्तत्वारिति कारित्वाकारित्वयोर्विरोधसाधकयोरित्यारिः ननु कुरूलस्थं बीजं यदि समर्थं स्यात्तदा कारि स्यादिति
प्रसंगः न करोति तद्बीजमतो न समर्थमिति विपर्ययानुमानं चोक्तं तयोः कथं विरोधे साधकत्वमित्याकांक्षायामाह इति कुतुपपा
दयति कार्यकारिभेदसिद्धिपर्यवसिताभ्यामिति कारिणोऽकारिणोर्भेदस्य परंपरया साधकाभ्यामित्यर्थः कारित्वस्य सामर्थ्य
व्याप्यतयाऽकारिणि समर्थभेदसिद्धौ कारित्वावच्छिन्नभेदोऽपि सिध्यतीति भावः स्वरूपेणैव एककालावच्छिन्नत्वाविशेषित
योरेव पूर्वोक्तदोषेण प्रसंगविपर्ययासंभवो यथा दोषस्तथा तयोः संभवेऽपि तत एव भेदसिद्ध्या भेदसाधनायत्तदधीनस्य करण
त्वाकरणत्वविरोधसाधनस्यायुक्तत्वेत्यपि दूषणमस्तीति दर्शयति यद्यपीति ताभ्यामेव उक्तप्रसंगविपर्ययाभ्यामेव भेदसिद्धौ
कार्यकारिणोर्भेदसिद्धौ विरोधेन करणाकरणयोर्विरोधसाधनेन तदुपजीविनाकार्यकारिभेदसिद्ध्यधीनेन एतावता विरो
धेन भेदसाधने अन्योन्याश्रयो दर्शितः भवतु तत एव भेदसिद्धिर्नावश्यं तैर्वेष्टसिद्धेरित्यभ्युपगमनिरासायेत्यारिः तावेवेति प्रसं
गविपर्ययावेवेत्यर्थः न संभवतदिति पूर्वोक्तदोषेणेत्यारिः इत्याहुरिति पुरस्फूर्तिकं दोषमाहुरित्येतयोः सामर्थ्यासामर्थ्यविषय

६३

त्वारिति प्रसंगस्य सामर्थ्यविषयकत्वात् विपर्ययस्य चासामर्थ्यविषयकत्वादित्यर्थः अत्र विपर्ययानुमानस्यापारका
भावरूपासामर्थ्यविषयकत्वमास्तां करणविषयकस्य तदपारकप्रसंगस्य तु कथं सामर्थ्यविषयकत्वमित्याकांक्षाया
माह प्रसंगादिति सामर्थ्यस्यापारकस्य हेतुतयाहेतुतज्ज्ञानविषयतया विषयत्वमित्यपि मेणान्वयः तथा च सामर्थ्यविषय
कत्वं प्रसंगस्य सामर्थ्यविषयकज्ञानजन्यत्वरूपं विवक्षितमिति भावः विपर्ययेतु तत्तादृशं सामर्थ्यविषयकत्वं विवक्षितं य
थाश्रुतं तद्विषयकत्वस्यैव संभवादित्याविष्कर्तुमाह विपर्यये चेति चस्त्वर्थः साध्यतयाऽऽपाद्यतया विषयत्वमिति यथाश्रु
तमेवेति शेषः उभयत्रैकविधविषयतानिर्वाहाय सामर्थ्यपदमन्यथा व्याचष्टे सामर्थ्येति सामर्थ्यप्रसंजनीयमिति शि
क्षासंबंधप्रदर्शनं इह सामर्थ्ये इह सामर्थ्यपदेन विवक्षितं मूलेतत्र चेति प्रसंगविपर्ययोस्त्वित्यर्थः उक्तत्वादिति अत्र किमु
क्तं केनवाग्रंथेनोक्तमित्याकांक्षातो मध्ये पूरयति सामर्थ्येहीत्यादिना दूषणस्येति दूषणं च सामर्थ्यस्य करणरूपत्वेऽपापा
दकयोरविशेषः योग्यतावच्छेदकबीजपरत्वेतरभावसाधने बाधः तादृशकुर्वद्रूपत्वपरत्वेऽपापादकाद्यप्रसिद्धिः योग्यता

वच्छेदकत्वेनबीजत्वादिसाधारणेनापादकत्वेनकोपयुक्तदोषइत्यनुशयेनस्तांवेत्यादिकमवतारयति नचिनिमूलेस्तां
वेत्यस्यप्रसंगविपर्ययाबुक्तदूषणशून्यावितिशेषः ताभ्यांप्रसंगविपर्ययाभ्यांविरोधःसाध्यतइत्यनेनान्वयःकरणाकर
णयोर्विरोधस्यप्रकृतनयाशक्यशक्तिपदयोःसामर्थ्यासामर्थ्यपरत्वासंभवात्करणाकरणपरतयातेविहनिहघ्चष्टे
करणाकरणयोरितिअविवक्षितकालभेदएवेत्यादेर्मूलस्ययस्यशरीरेकालविशेषप्रवेशेनविवक्षितःयदायत्रकरणंतद
तत्रनाकरणमित्येवंरूपोयोनतादृशःयत्रकरणंतत्रकदापिनाकरणमित्येवंरूपोनसाधयितुंशक्यतेतत्साधकस्यकाल
विशेषाविशेषितकरणपाद्यकप्रसंगादेरिष्टापत्त्यादिनानिर्वाहादृत्यर्थेयदातदेत्यपेक्ष्ययत्समर्थंतत्करोत्येवेतिकर्तुंश
क्यंइत्यग्रिमशंकाविरोधात्तादृशप्रवेशेनव्याप्तौकालविशेषाप्रवेशमभ्यपगम्यैवकारार्थप्रवेशेनतत्कार्यनिर्वाहस्यशक्ति
तत्वात्प्रसंगविपर्ययमूलव्याप्तौयदातदेत्येतदप्रवेशखंडनस्येवेरानीसंगतिरतोयत्रकालभेदोनविवक्षितइतिनेबहुव्री
हिविग्रहः अपितुषष्ठ्यंतयत्पदेनैवसःषष्ठ्यर्थश्चस्वसाधकव्याप्तिघटकतयासाधकत्वरूपःसंबंधइत्याशयेनतादृश

व्याप्तिशरीरेएकप्रवेशखंडनपरतयैवतन्मूलंव्याचष्टे नविवक्षितइतिनयाचकालविशेषागर्भव्याप्तिमूलकप्रसंगवि
पर्ययाभ्यांकरणाकरणविरोधोनसाधयितुंशक्यतइतिसाध्यतइत्यंतस्यफलितार्थःतथोपसंहर्तुमित्यत्रतथाशब्दस्या
र्थमाह व्याप्तौकालभेदप्रवेशमंतरेणेतिउपसंहर्तुमशक्यत्वादितिमूलानुवादःतस्यप्रसंगविपर्ययोरित्यादिःउपसं
हर्तुंनिर्वाहयितुंतन्निर्वाहविरोधिदूषणमाहकुसूलस्थइतिइष्टापत्तिंविहणोतिउत्तरकालमितिकरणाभ्यपगमादिति
स्थिरवादिनेत्यादिःविपर्ययेऽकरणेनविपर्ययानुमानेहेत्वसिद्धेःयादृशमकरणंहेतुःतस्यकुसूलस्थेप्यसिद्धेःतत्साधार
णमकरणमात्रंकथंनहेतुरित्याहव्यापकविरोधिनएवाभावस्येतिव्यापकस्यापाद्यस्यविरोधीयादृशोव्यापकाभावस्ता
दृशस्यैवतस्येत्यर्थः व्याप्याभावसाधकत्वात्व्याप्यस्यापादकस्याभावसाधनेहेतुत्वात् अन्यथानिप्रसंगात्द्रव्यत्वादि
व्यापकसंयोगादेर्द्रव्यादिसाधारणाभावेनद्रव्यादौद्रव्यत्वाद्यभावसिद्धिप्रसंगात्प्रकृतेकीदृशमकरणंसामर्थ्यव्यापं
ककरणविरोधितदाहकरणस्यचेतिसर्वथैवाकरणमितिव्याप्यवृत्तित्वविशिष्टःकरणाभावइत्यर्थः अन्यथाऽकरणमा

त्रस्य करणविरोधितया सामर्थ्याभावसाधकत्वे सामग्रीनिवेशिनइति कुर्वद्रूपस्यापीत्यर्थः देशांतरे देशांतरावच्छेदे
नअकरणात्करणाभाववत्वात् कुसूलस्थबीजे तादृशमकरणमसिद्धमित्याह नचेति तथा तादृशमकरणं तस्यैव कु
सूलस्थस्यैव मत्प्रत्यक्षसिद्धत्वादिति कुसूले यदासीत्तदेव बीजं क्षेत्रे कुरं करोतीति प्रत्यक्षसिद्धत्वात् ननु क्षणभंगवादिनां ता
२ दृशप्रत्यक्षस्य प्रामाण्यमेव नोपपद्यते इत्याशंक्याह तत्प्रामाण्यसंदेहेपीति तादृशप्रत्यक्षस्य प्रामाण्ये क्षणभंगवादिनां वि
वादे न तत्संदेहेपीत्यर्थः हेतोः संदिग्धासिद्धत्वादिति कुसूलस्थकरणेऽव्याप्यवृत्तितासाधकप्रत्यक्षस्याप्रामाण्यसंदेहा
त्संदिग्धतया व्याप्यवृत्तित्वविशिष्टस्याकरणरूपहेतोस्तत्राभाववनिश्चायकत्वेपि अभावसंदेहस्य दुरपनेयत्वादित्यर्थः मूले प
शेषित्याचेति कारिभिन्नेपि जातनष्टबीजे तत्स्मिन्बीजत्वस्य योग्यतावच्छेदकत्वमंगीकुर्वाणैर्योग्यतावच्छेदकरूपात्मक
सामर्थ्योपगमेन व्याप्यसिद्धेश्चेत्यर्थः इष्टापत्त्या देशभावादिति कदाचित्कारिणीकरोत्येवेति व्यवहारविरहेणतदर्थस्या
पाद्यभूतस्यासत्वादित्यभिमानः करोत्येवेति क्रियासंगतेवकारस्यासत्तायोगव्यवच्छेदार्थकतया असत्तायोगस्य च

व्याप्यवृत्तभावरूपतया कदाचित्कारिण्यपि तादृशैवकारार्थस्याबाधेनेष्टापत्तावपि करोत्येवेत्यावत्सत्वमिति विवक्षणेऽ
यंजागर्त्येवेत्यादौ क्रियासंगतेवकारस्यापि व्याप्यवृत्तित्वाविशेषितायोगव्यवच्छेदार्थकतया प्रकृतेवकारस्यापि तदर्थकत्वे
वा कालनियमाविवक्षायामित्यारिमूलोक्तेष्टापत्तेरयोगात् स्वयं तत्प्रसंदूषयितुं वितर्कयति करोत्येवेत्यत्रेति विवक्षितं अ
धिकं प्रयोक्तव्यं आद्यः विवक्षितमिति पक्षः व्याप्यसिद्धेः व्याप्यनिश्चयात् अनिश्चयः कुतस्तत्राह कुरेति प्राक् कुसूल
स्थतादृशायां प्रत्यक्षसिद्धत्वादिति यदि दं क्षेत्रस्थमंकुरं करोति तदेव कुसूलस्थं नाकार्षीदिति प्रत्यक्षसिद्धत्वादित्यर्थः ता
दृशप्रत्यक्षप्रामाण्ये विवादेपि कुसूलस्थाभेदस्य समर्थक्षेत्रस्थबीजे संदेहेन यावत्सत्वकारित्वस्याभावस्तत्र संदिग्धइ
ति व्यभिचारसंशयोदुर्वार एवेति भावः एतेन व्याप्यसिद्धिरूपदोषेण अयोगव्यवच्छेदेन नियमइति व्याप्यवृत्तित्वाविशेषि
तस्यायोगस्य व्यवच्छेदेन निरूपिता व्याप्तिरित्यर्थः द्वितीयेनेति पक्षे मूले कालनियमाविवक्षायां यदातदेत्यपेक्षायां इति
त्यादित्यर्थ उक्तोदाहरणस्य स्यात् तथा च तथाहि संभवविधेः आख्यातसमभिव्याहारेण विहितायाः क्रियायाः असत्ता

योगः आत्यंतिकोऽयोगः आत्यंतिकत्वं च नीलेसरोजंभवत्येवेत्येवेत्यादौ अन्वयिताव च्छेदकव्यापकत्वं प्रकृते च व्याप्यवृत्ति
त्वं विरुद्धो व्याघातकः नत्वयोगः नत्वात्यंतिकत्वाविशेषितायोगः तथा च कदाचिदयोगसत्वेपि कदाचित्करणादेवापा
द्यसत्वादिष्टापत्तिरितिभावः ननु यदा तदेत्यस्य परित्यागेपि अंकुरमहत्वेव विनष्टे बीजे सर्वदाऽकारिणि सामर्थ्येन क
रणापादनसंभवात् तत्राकरणेन करणविरोधिनास्वरूपायोग्यत्वसिद्धिप्रसंगइत्यत आह विघ्नो एवं चेति वस्यतेन
त्रेति सहकारिविरहस्याकरणप्रयोजकतया सामर्थ्येप्यकरणसंभवेन मूलशैथिल्यमित्यर्थः यदा तदेत्यपेक्षायामुक्त
दोषेण प्रसंगाद्यसंभवेपि तदंतर्भावेण नियमादेव समीहितं निर्वहेदित्याशंकते यदिति यदा यत्कार्यसमर्थं यत्कालवृत्ति
त्वविशिष्टं सद्यत्कार्यसामर्थ्यवत् समर्थस्यापीत्यस्याकरणस्येत्यस्य च तदेत्यादिः स्तोवेत्यादिमूलमन्यथा वक्तार्यव्याच
क्षाणानां व्याख्यामुपन्यस्य निरूपितं चित्तिनिकरणाकरणविषयाविति सामर्थ्येन करणापादनस्याकरणेनासामर्थ्यसाध
नस्य च एवं दूषितत्वेपि अकारियदिकारिस्यात् अकारिनस्यादिति प्रसंगः अकारि चन्नतत्ततो नकारिदतिविपर्ययश्च

करणाकरणयोर्विरोधं साधयेदित्यर्थः एतयोरुपसंहारार्थाशंकाबीजं दर्शयति करणेनेति स्वरूपतोऽवैशिष्ट्यादित्यन्वयः
आपाद्यापादकयोः प्रकारभेदेपि धर्मिस्वरूपयोरभेदादित्यर्थः अकरणभावस्य करणरूपत्वादित्यर्थः नच प्रकारभेदान्ना
पाद्याविशेषो दोषमावहेदिति वाच्यं करणत्वेनापादकसंशयदशायामकरणाभावत्वेनाप्यकरणाभावस्य करणस्य संशयः
संभवादकरणाभावत्वरूपाद्यतावच्छेदकावच्छिन्नाभावनिश्चयासंभवात् प्रकृते प्रकारभेदे पि तर्कासंभवात् प्रकारतोपवै
शिष्ट्यात् करणाभावत्वरूपैकप्रकारावच्छिन्नयोरेवसाध्यसाधनभावात् अविशिष्टकारित्वेन व्याप्यवृत्तित्वविशिष्टो करणा
भाव आपादनीयः नचापाद्याप्रसिद्धिः यद्यधर्मवत्तत्र व्याप्यवृत्तित्वविशिष्टतदभावाभाववदिति उभयसिद्धव्याप्यवृत्ति
धर्ममादाय सामान्यतो व्याप्त्या उभयमतासिद्धस्याप्यापादनसंभवादित्याशंक्य मूलशैथिल्यरूपदोषांतरमाह कालभे
देनेति कालविशेषांतर्भावेण व्याप्तिं दूषयति यदेति तदा न तदकारीति तत्कालावच्छिन्नस्य तदकारित्वस्याभाववदित्य
र्थः अत्र च नव्याप्यव्यापकयोरभेदः तत्कालावच्छिन्नत्वविशिष्टतदकरणस्याभावस्य करणरूपत्वासंभवादिति भावः अ

भावो व्याप्यवृत्तित्वेन विशेष्यः आपादकासिद्धीति यद्बीजं यदाकारितत्र तदाकरणानभ्युपगमादापादकासिद्धिः अतः
आपादकाभावस्य तत्रोभयसिद्धतया तत्र तत्साधने सिद्धसाधनमित्यर्थः कारित्वस्यापादकत्वे यत्समर्थमित्यादिमूलेन
सामर्थ्ये व्याप्तिप्रदर्शने विरोधइत्यत आह यत्समर्थमिति एतद्व्याख्याने ऽस्वरसबीजं स्वयमाहात्रेति उपजीव्येति करणा-
करणाविरोधस्यैव प्रसंगादिमूलव्याप्तित्वादिति भावः तयोः प्रसंगविपर्ययोः कथं तत्साधकत्वाशंकेति अन्योन्याश्रयेण तयोः
करणाकरणाविरोधसाधकत्वाप्रसक्तेरिति भावः नन्वयदसमर्थं प्रथममासीदित्यादिना पूर्वमसमर्थस्य बीजस्योत्तरकालं स
हकारिकसाकल्ये सामर्थ्यमनुपपन्नं सहकारिसाकल्ये समर्थस्य धरणादेरुत्तरकालं सहकारिवैकल्ये चासामर्थ्यमनुपप-
न्नं सामर्थ्यस्याजन्यतयोपगमापगमासंभवादिति शंकानगच्छते सामर्थ्यस्य बीजत्वादिरूपस्य यावद्धर्मिसत्वमवस्थानस्या
स्माभिरप्युपगमाद्धेतुः सामर्थ्यस्य करणप्रयोजकत्वं नैयायिकैरप्युपेयं सहकारिसाकल्येऽप्यसमर्थेनाकरणात् तथा च स्थिर
पक्षे बीजादेः सामर्थ्योपगमे तदपगमासंभवात्करणप्रयोजकसत्वेन सर्वदैव करणं स्यात् तदनुपगमे सर्वदैवाकरणं।

स्यादिति समर्थं बीजादिकं करणदशायामेव नान्यदेति क्षणिकत्वं दुर्वारमित्यभिप्रायकतया मूलं संगमयति सामर्थ्यप्र
युक्तमिति सामर्थ्यं च जनकतावच्छेदकरूपमित्यनेन सामर्थ्यस्य जातिरूपतया नोपगमापगमसंभव इति सूचितं उपगमः
पूर्वमसतः पश्चात्सत्वं अपगमः पूर्वं सतः पश्चादसत्वं सहकारिमतस्तत्कारकत्वं सामर्थ्यमित्यादिसमाधानग्रंथेन यथाश्रु
ते न करणाकरणयोः सामर्थ्यासामर्थ्यरूपत्वं लभ्यते तावता जनकतावच्छेदकस्य रूपस्य करणप्रयोजकताया अखंडि
तत्वाऽऽक्षेपो नसमाधीयते अतस्तत्समाधानायतदाशयं व्याचष्टे जनकतेति परंतु सहकारिसाकल्यविशिष्टमिति त
थाच सहकारिसाकल्यस्य नोपगमापगमाकरणप्रयोजकविशिष्टरूपस्योपगमापगमावितिन सर्वदाकरणादिप्रसंगऽइति
भावः एवं च सहकारिमतस्तत्कर्तृत्वं सामर्थ्यमिति फलस्य सहकारिसमवहितस्य कारणतावच्छेदकरूपत्वं सामर्थ्यमित्य
र्थः करणप्रयोजकमिति शेषः सहकारिसमवहितस्यापि यथाश्रुतं दन्यत्वादसंगतिरतोऽन्यपदं विरोधपरं तथाव्या
चष्टे तदितितथाच फलस्य सहकारिसमवधानविरोधिमतोऽकर्तृत्वं सहकारिसमवधानविरहप्रयुक्तो विशिष्टस्य जन

कतावच्छेदकरूपस्याभावः असामर्थ्यमकरणप्रयोजकमित्यर्थः औत्पत्तिकमस्य रूपेस्वाभाविकः कारणधर्मः सोप
सर्पणेति कदाचित्कस्वसमवधानप्रयोजकसामग्रीबलात्भिन्नकालाः असार्वकालिकसमवधानाः इत्यर्थात् इति
हेतोः कार्याणामपिभिन्नकालतार्कदाचित्कोत्पत्तिकता तथापीत्यादिना मूलेनएकदेशास्थकारणस्य देशांतरे कार्यज
नन दृष्टांतेनएककालस्थकारणस्य कालांतरे कार्यकरणं प्रसंजितं तन्न प्रसंगच्छते तथाहि ज्ञानादिरूपकार्यस्य
विषयतासमवायादिरूपदेशिकविभिन्नसंबंधानां विभिन्नदेशैतया विभिन्नदेशास्थाएव तत्तेसंबंधेनकार्योत्पादक
सामग्रीर्विभिन्नदेशेषु कार्यंजनयंति नतुसर्वाधिकरणे तत्कारणापेक्षाकालेवुकालिकसंबंधेनकार्योत्पत्तौ तत्सर्वकालेत
संबंधेनसकलकारणसत्तापेक्षायांबाधकाभावादन्यकालेकार्योत्पत्तेर्वारणसंभवइत्यतः स्वर्गस्मरणादिरूपकार्यस्या
व्यवहितपूर्वकाले यामानुभवादिकारणसत्वेन तादृशकालेकारणसत्वस्य कार्योत्पत्तावपेक्षायौ दुर्वचेत्याशयेनाशं।
कांसंगमपितुमाशंकातात्पर्यं विवृत्तिकारो विवृणोत्तिस्यादेतदितिसहकारिसमवधानस्य कार्योत्पादप्रयोजकताया ६८

व्यवस्थापितत्वात् तथापीत्यस्यमूलस्थस्यतदर्थकतांस्फुटयति अस्तुसहकारीति एकदेशास्थ वदिति दृष्टांतमादौविवृ
णोति यथेतिएकदेशास्थोविषयादिरिति तादात्म्यसमवायादिरूपकारणतावच्छेदकसंबंधेनविषयप्रत्यासन्नोविषयत।
दिंद्रियसंयोगादिरित्यर्थः देशांतरे आत्मादौसहकारिसंपत्तौसमवायादिनाकार्योत्पत्तिप्रयोजकस्यमनोयोगादेः समवधा
ने तत्रदेशांतरेआत्मादौभावोबीजादिःयागादिरूपकारणस्यका र्योव्यवहितपूर्वकालेसत्वेपिपूर्वकालेऽवश्यंसत्वात्
कारणस्य पूर्वकालसत्तायाः कार्योत्पत्तिप्रयोजकत्वस्यानपवादादुत्तरकालस्थात्पूर्वकालेकार्योत्पत्तिर्नसंभवतीतिस्वना।
शोत्तरकालइत्युक्तं जातुनष्टःकरोतितिमूलतएवतत्बलाभःसहकारिसंपत्तेः प्रयोजकत्वाभ्युपगमात्तांविनानापत्तिरतःस
हकारिसंपत्ताविति तत्कार्यं अंकुरादिकं जनयेदिति तथाचस्वोत्पत्त्यनंतरमेवसमर्थोभावः करोतीतिस्वभावोवाच्यइति
सणसंगसिद्धिरितिभावः स्वरूपापेक्षयेत्यादिविकल्पार्थंव्याचष्टे एकेतीतिकोर्थइत्यस्यकोर्थः स्वाधिकरणेति कार्यपूर्वेस्वा
धिकरणकालस्थइत्यर्थः पूर्वेतंव्यवहिताव्यवहितसाधारणे कालेस्वाधिकरणत्वमविवक्षितं येयकालस्थस्तत्कालस्यतद।

धिकरणत्वनियमेनाव्यावर्त्तकत्वात् तत्कार्योत्पत्तुगुणेति सहकारिसमवधानविशेषणं आद्यइति मूलस्य प्रसंगे समाधान
तव्यइतिशेषः नकिंचिदनुपपन्नं नकाचिदनुपपत्तिः अत्रदेतुं पूरयति विद्यन्नोस्वकालस्वस्यैवेति कार्यपूर्वकालेवर्त्तमा
नस्यैवेत्यर्थः सहकारिसाकल्ये कार्यजनकतायाः सहकारिसमवधानप्रयुक्तकार्योत्पादकतायाः स्वस्यकार्योत्पादक
त्वे स्वस्यकार्यपूर्वकालवर्त्तमानत्वं कार्यावहितपूर्वकालेसहकारिणां समवधानंचप्रयोजकमित्यस्माभिरुपगमादिति
फलितार्थः एवंसति साक्षादंकुरादिजनकबीजादीनां नाशोत्तरं तत्कार्योत्पत्तिवारणप्रकारस्तदेवत्वित्यादिना साक्षात्परंप
राहेतुत्वस्थलयोः कार्योत्पत्तिप्रयोजकविशेषदर्शनात् स्फुटीभविष्यतीतिभावः नित्यानामप्येवरूपत्वादिति तथाचे
वंरूपताकारणस्यसदातनत्वमेवनविरुणद्धि कुतः स्थेयमितिभावः वर्त्तमानैकस्वभावतास्वभावानामितिकारणानां कार्यो
त्पत्तिप्रयोजककार्यपूर्वकालवृत्तिस्वभावत्वादित्यर्थः तदेवेतिव्याचष्टे विद्यन्नोवर्त्तमानत्वमितिकार्योत्पत्तिप्रयोजकंकारणा
स्यपूर्वकालवृत्तित्वमित्यर्थः क्वचिन्नावधीति मूलेक्वचिदित्यस्यसव्यापारकारणइत्यर्थः क्वचिदित्यनद्यमावधीतिव्याचष्टे

कार्योत्पद्यमानतेति उत्पद्यमानतेति उत्पत्त्यव्यवहितपूर्वकालसंबंधः तत्पूर्वकालमात्रावधि तत्पूर्वकालमात्रसत्वमि
त्यर्थः क्वचिन्निरवधीति मूलेक्वचिदित्यस्यनिर्व्यापारकारणइत्यर्थः तदनद्यनिरवधीति व्याचष्टे कार्योत्पद्यमानतेति
कार्योत्पत्त्यव्यवहितपूर्वकालसत्वरूपमित्यर्थः व्यापारद्वाराकारणस्यव्यवहितपूर्वकालसत्तायाः कार्योत्पत्तिप्रयोज
कत्वोपगमे ताद्दशोकारणाधीनकार्योत्पत्तिकालानियमइत्यनुयोगसमाधानपरतयासावधित्वोपीत्यादिमूलमवतार
यति नन्वित्यादिफलप्रकर्षोप्रकर्षाभ्यामित्यस्यव्याख्या फलानुगुणेत्यादिलाभालाभाभ्यांलाभलाभप्रयुक्तविशेषइत्यस्य
शेषः कार्योत्पादेत्यादि तथाच लाभालाभयोरुक्तरूपविशेषद्वयेयथासंख्यमन्वयः व्यापारपदफलपदयोः कर्मधार
याशयेन व्याचक्षाणानामतमाह व्यापारेति अतिप्रसंगवारणस्यातिस्फुटत्वार्थं समुदितार्थमाह तदयमितिस्वस्य
सहकारिसाकल्यमित्यन्वयः सहकारिसाकल्यंअव्यवहितपूर्वकालेसहकारिणां सामानाधिकरण्येइदंस्वस्वव्यापारयोः
सहकारिसमवधानंनिरन्वयध्वस्तस्यनिर्व्यापारस्यविनष्टस्य बीजयागादेः येनकेनापिसंबंधेनसहकारिसामानाधि

कारणस्यातिप्रसंजत्वमाशंक्याह अन्वयव्यतिरेकशालिनः अन्वयव्यतिरेकग्रहविषयस्य स्वस्वनिष्ठकरणतावच्छेद
कसंबंधवत्तस्येतियावत् नियामकत्वात् कार्योत्पत्तिप्रयोजकत्वात् नातिप्रसंगइति एतत्ज्ञानार्थमेवफलानुयुगेयु
क्तमित्याशयः मूलेद्वितीयस्त्विति सहकारिसाकल्याधिकरणैककालस्वनाशानंतरकालेकार्यंकरोतीति प्रसंगस्ति
त्यर्थः स्यादपिसंभवेदपि तेषांसहकारिणांयोगपद्यंयदाकार्यमापाद्यते तदव्यवहितपूर्वकालेस्वतोव्यापारतोवाप्रत्या
सन्नेनस्वेन सहयुगपदवस्थानंभवेत् क्रमिणः आपतिस्थलेयोगपद्यरहिताः स्वस्वकालेसहकारिसहितःसन्नेव
स्वनाशानंतरंकरोतीत्याक्षेपउक्तसमाधानोत्तरमसंभवदुक्तिकएवेत्याह सहकारिसहितइतियागादिरूपकारणस्य
स्वगोचरव्यवहितपूर्वकालेसहकारिसाहित्याभावात्स्वरयति विद्वतो स्वतोव्यापारतोवेति मूलेनिरर्गलशैशवस्येति
बहुव्रीहिः ध्रुवोरशैवस्येत्यर्थः स्वतोव्यापारतोवासहकारिभिः समंकारणावस्थानस्य कार्योत्पत्तिप्रयोजकस्याव्यवहित
प्राक्कालसत्ताया अपेक्षितत्वेनापत्यनवकाशादितिभावः विद्वत्तोएककालत्वेपीतिस्थिरवादिमतेएककालत्वेपि

सएवेत्यस्यव्याख्यासहकारीतिसामग्रीसमवधानोत्तरमेवेत्यर्थः मूलेअन्यथेतितत्वागत्ताबाधारश्चेत्यर्थः तद्वृत्तिवेति
व्यवहारपदस्यसामान्यपरत्वासंभवात् विशेषपरतयाव्याचष्टेकारणेतिकारणपदस्यबहुस्वरत्वेपिपौर्वापर्येत्यनेनय
थासंख्यमन्वयायपूर्वनिपातः कारणकार्यापेक्षयापूर्वव्यवहारेतस्यकार्यकालवृत्तिताया जातंयद्यपिनापेक्षितंव्यवह
योर्विषयकत्वात् तथापिकार्योत्पत्तेर्यःकालःकारणसमानकालीनप्रागभावप्रतियोगित्वेन तत्कालावृगाहितवृत्तित्वेन
प्रतिसंधानंहेतुत्वेनकार्येपरत्वव्यवहारएवान्वितंकार्यप्रागभावकालवृत्तित्वेप्रतिसंधानमेवचकारणेपूर्वत्वव्यवहारे अन्व
यश्चयथायोगंनतुयथासंख्यमतःसामंजस्यएवचकार्यकालस्यकारणकालत्वकल्पनानुपयोगात् सचेतिमूलस्थसइवे
त्यर्थः मूलेयदातदेतियदायसमर्थंतदातत्करोतिइतिप्रसंगादिमूलेव्याप्तौ यदातदेत्युपेक्षातस्थानेदेशपरंयत्रतत्रे
तिप्रक्षिप्तमित्यर्थः तथारेवतादृशयोरेवतर्हितादृशप्रसंगादेरदुष्टत्वेदोषादेतप्रसंगविद्वणातिबीजादेरित्यादि एकस्मि
न्देशइवएकदेशावच्छेदेनेवचस्वतोयत्रोत्पत्तिस्तद्देशावच्छेदेनेवेति यावत्देशांतरेसर्वदेशावच्छेदेनतत्रापिसर्वे

त्रैवांकुरादिजननात् उक्तव्याप्त्यनुरोधेनांकुरादिजननस्योपगंतव्यत्वात्सर्वत्रांकुरादिजननेसर्वेषामभेदरूपमद्वै
तंनापादयितुंशक्यते तदापादकस्यडुर्वेचत्वादतआदसर्वकार्यवत्वरूपमद्वैतमितितत्रेष्टापत्तेर्नोवकाशइत्याहत
थाचेतिकार्याणां अंकुरादीनांसर्वेषां अनादित्वमेवेति एककालीनत्वामंतरेणाधाराधेयभावानुपपत्त्याकार्याणां पूर्वपूर्वा
शेषदेशसमानकालीनत्वस्वीकरणीयत्वादितिभावः साधुसंगतिकर्तुमिति समर्थितमितिशेषः देशांतरे असामर्थ्यापग
मेकारणभेदआपादितस्तंविहणोति असामर्थ्येइत्यादि असामर्थ्यं अंकुराद्यसामर्थ्यं बीजादेर्देशांतरइत्यनुषज्यते सामर्थ्यो
सामर्थ्यलक्षणेति एतद्देशावच्छिन्नसामर्थ्यान्यदेशावच्छिन्नासामर्थ्यरूपेत्यर्थः बीजादिजातीयानांभेदोऽभ्युपगतएवेत्यतो बी
जादिव्यक्तेरिति एकत्वेनपराभ्युपगताया अपिबीजादिव्यक्तेरित्यर्थः भेदआपद्येतेति देशभेदेनेत्यादिः देशभेदेनसामर्थ्यो
सामर्थ्ययोरविरोधेकालभेदेनापितयोर्विरोधेनस्यादिति क्षणभंगसाध्यकविरुद्धधर्माभासइतिभावः एतावताबाह्यशून्य
तानायातीतिइष्टापत्तिसंभवइत्यतोभावमाह तथाचेति तस्याइतिदेशभेदेननिन्नातयाभ्युपगतानांबीजव्यक्तीनामेकेक ७१

व्यक्तेरित्यर्थः पूर्ववद्देशभेदेनसामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मोदेवपुनर्नेदापत्तावितिपुनःपुनर्भेदापत्तावित्यर्थः बी
जादिशून्यत्वमेवेति बाह्यार्थभंगएवेत्यर्थः काप्येकत्वोक्तौविश्रांतिविरहादितिभावः नन्वपरेषांसामर्थ्यस्यकुर्वद्रूपत्वजाति
रूपस्यव्याप्यवृत्तितयादेशविशेषाणांतदवच्छेकताप्रसक्तयादेशोकरणंतद्देशावच्छेदेनसामर्थ्यरूपमापादकमप्रसिद्धंभव
तुवाव्याप्यवृत्तेरप्यवच्छेदकोपगमः अन्यथान्यायमतेपिसामर्थ्यस्यबीजत्वादिरूपस्यापिव्याप्यवृत्तितयाकुसूलावस्थानद
शावच्छिन्नसामर्थ्यरूपापादकाप्रसिद्धा तेनतत्कालावच्छिन्नकरणापादनमपिपरेषांनिर्वहेत् यदिचतद्देशावच्छिन्नंसाम
र्थ्यंनापादकमपितुसामर्थ्यमेवयदासामर्थ्यंतदाकरोतीतिअवच्छेदकतानियतिताव्याप्तिः तदुलाभस्तुदेशेनैवसामर्थ्येन
कुसूलावस्थानदशावच्छिन्नेबीजेऽभ्युपगतेनतदवच्छिन्नेकरणापादनमित्युच्यते तदापिव्याप्यवृत्तेरवच्छेदकानभ्युपगमे
उक्तरीत्याकालगतोपादकस्वरूपाप्रसिद्धेरकिंचित्करत्वेपि तद्देशावच्छेदेनैवायिकैःसामर्थ्यस्यानभ्युपगमेनापादका
सिद्धेर्यत्कालावच्छेदेनसामर्थ्यमित्यादिव्याप्तिप्रसिद्धेर्दुर्वारत्वात्तथापिप्रकृतानिर्वाहः अवच्छेद्याधिकरणासंबद्धस्यानवच्छे

दकतया कुर्वद्रूपतत्तद्बीजानधिकरणदेशानांतन्निष्ठसामर्थ्यावच्छेदकत्वासंभवात् परेषांतदभ्युपगमासंभवेनसक
लदेशोकरणापादनायोगात् कथितरीत्याबीजस्यानादित्वापादनपर्यवसानस्यासंगतेः असामर्थ्योपगमेशून्यताप्रसंगे
तत्यसंभवइतिकस्यापितत्तद्देशावच्छिन्नसामर्थ्यस्यबीजपरेरुपगमेनाकापत्तिसंभवइतिचेदुच्यते तदापियद्देशं कुरो
त्यत्रिविरहस्तद्देशावच्छिन्नतत्सामर्थ्योप्रसिद्धाःप्रसिद्धस्यतद्देशेतत्करणस्यकथंतेनापादनंनचसर्वदेशोकार्यं विशेषा
विशेषितसामर्थ्येनकार्यविशेषाविशेषितंकरणमेवकुर्वद्रूपबीजप्रसंजनीयमितिवाच्यं तथासति सर्वदेशानांसर्वकार्य
वत्वरूपदेशाद्वैतापत्यनिधनासंगतेः यदिचसामान्यव्याप्त्याःप्रसिद्धेनापिविशिष्यपादकेनाप्रसिद्धस्यापिविशिष्टस्याप
त्तिसंभवःप्रकृतसाध्यसाधनव्याप्तिग्रहानपेक्षायाव्याप्तिग्रहानुरोधेनतत्वसिध्यपेक्षाविरहात् विशिष्टापादकाप्रसिद्धावा
पिपरेषांविशेषणपुरस्कारेणपक्षेविशेष्यवत्ताभ्युपगमसंभवेनाहार्यविशिष्टापादकारोपरूपकारणनिर्वाहादित्युच्यते
तदाप्यन्यदेशस्यसामर्थ्योनवच्छेदकत्वेपितदवच्छेदेन बीजादावंकुराद्यसामर्थ्येकिमर्थमुपगंतव्यंयेनसामर्थ्योसामर्थ्यवि

रुद्धधर्मोभासेनएकत्वेनाभ्युपगतस्यापिभेदआपाद्येतकुर्वद्रूपत्वरूपस्यसामर्थ्यस्यव्याप्यवृत्तितयातदभावःसमर्थेकथंवा
उपगंतव्यः अधिकरणभेदेनभिन्नतयाअभ्युपगतायाश्चक्रेर्यत्राधिकरणेसामर्थ्यं तदन्यदधिकरणमनधिकरणमेवेतिस्वा
संबद्धतदवच्छेदेनकथंवासामर्थ्योभावोवर्त्ततेयेनभेदप्रसंगानवस्थयाजगत्येकमपिवस्तुदुर्लभंस्यात् एतेनकालभेदे
नकरणाकरणयोरेकत्रासत्वेभेदेनापितएकत्रनस्यातां तथाचतद्बलात् सर्वैवव्यक्तिःसतीतिनिर्वेतेतिवाच्यार्थेभंगपर्यव
सानमित्यपिहेयं एतद्देशोकारिणिअन्यदेशावच्छेदेनकरणवत्करणस्याप्यनभ्युपगमेबाधकाभावात् अथैवमिदमत्रक
रोतिनान्यत्रेतिकथंव्यवहारइतिचेत् तादृशव्यवहारेणकार्योव्यवहितप्राक्कालावच्छिन्नकार्याधिकरणदेशावृत्तिरू
पकार्यकारितानिरूपकत्वाभावस्यदेशांतरनिष्ठतयाऽवगाहनात् [illegible]देशाकरणतद्देशाकरणाभावयोस्तद्विषयत्वेपि
नसतिः एकविशेषस्यविशेषांतराभावविरोधविरहादितिचेत् सत्यंतदनधिकरणदेशस्यतन्निष्ठसामर्थ्याकरणयो
रवच्छेदकत्वानभ्युपगमेसंभवेपियद्यन्निष्ठत्वधर्मवत्वानवच्छेदकंतत्तन्निष्ठतदभावावच्छेदकमितिनियमाभिमानेनवा

त्य शून्यत्वमापातत आचार्यैरापादितं शिरोमणिभिरपि एतदाशयेनैवतदापादनमुपपादितं अतएव शिरोमणि-
भिरुक्तं उपपत्त्याकारणमात्रभेदापादनासंभवमग्रेनन्वित्यादिनाप्रदर्शयेत्उभयदेशेविभिन्नकार्यजनकस्यैकत्वयोभयभि-
न्नकारणस्यानेदप्रसंजनएवाचार्यैर्णनिर्भेदोदर्शयिष्यते देशादे[illegible]णभेदस्यचापत्तावितिपरताआपद्यता
मित्यस्यनसंभवति तस्ययोगाचारमतत्वविरहेणतदादायेत्यादि विरोधादित्यत्रआह भावार्थकृतनिर्भेरइति अभिप्रेतापत्ति
विषयेबाह्यशून्यत्वेकृतोपगमइत्यर्थः आपद्यतामित्यत्रक्रियायांकर्तुरनुक्तत्वाद्दुक्तानुपपत्त्याकारणभेदइत्यस्याउपद
मुक्तस्यानुषंगासंभवात्कर्तृपदंप्रयुंक्ते बाह्यशून्यत्वमिति मूलेतदादायबाह्यार्थशून्यत्वमभ्युपगम्ययोगाचारःकइ
त्याकांक्षायामाह योगाचारइतियोगाचारनयस्यनगरत्वेनरूपणंबाह्यविदूषिप्रवेशौचित्येन तन्नयप्रवेशोहेतुफलभा
वबादस्यवैरितामूलकृतोक्ता तदपवादेचसत्वरूपसाधनसन्यासः तद्भेदमुपपादयति तन्नयानुसरणंहीति हेतुफलभा
वंकार्यकारणभावंअपोह्यखंडयित्वा हेतुफलभावमित्यनुषज्यते आद्येहेतुफलभावाभ्युपगमेज्ञानात्मकदेशकालेवेति ७३

विज्ञानवादिनांज्ञानातिरिक्तवस्त्वाभासत्वेनज्ञानाधारदेशकालयोरपिज्ञानरूपत्वादितिभावः ज्ञानेतिकार्यरूपेत्वा
दिविज्ञानस्येतिकारणात्मकेत्यादिः पूर्वोक्तन्यायेनबीजशून्यतापर्यवसानयुक्तितुल्ययुक्त्याविज्ञानवादिनामसत्वेनोपगतस्य
ज्ञानस्याप्यसत्वेनशून्यत्वंसर्वशून्यत्वंद्वितीयकार्यकारणभावोपगमपक्षेसामर्थ्योसामर्थ्योयोः कारणत्वाकारणत्वरूप
योः असिद्ध्याअप्रसिद्ध्यासाधकाभावेननभेदासिद्धेसत्वार्थिकरणबीजादेःक्षणिकत्वरूपसाध्यासिद्ध्याइष्टांताभावेनसत्वस्य ६=
हेतोरसिद्धव्याप्तिकतयासत्वस्यक्षणिकत्वसाधनत्वेनोपन्यस्तस्यपरित्यागेसाधनत्वेनोपादानासंभवेसत्वस्यकिंचित्कार्य
कारणत्वरूपत्वेनकारणत्वापवादेअप्रसिद्धत्वेनवापरित्यागेक्षणिक[illegible]साधनसंभवेस्वमतपरित्यागोद्वाभ्यस्थेयपक्षस्याप्य
भ्युपगमसंभवेनकिमर्थंबाह्यस्यासत्वमतानुसरणमित्याहेत्यर्थः [illegible]मतमालंब्यदेशादेतत्प्रसंगेऽष्टापत्तिशंकनरू
पतयाआपद्यतामितिमूलंव्याकुर्वाणानामतमुपन्यस्यति केचिदितिसर्वेषामंकुरादिरूपाणांकार्याणांज्ञानरूपाणांज्ञानाभि
न्नदेशत्वंज्ञानरूपदेशत्वेत्वंतेषामिवतदधिकरणदेशानामपिज्ञानाकारातिरिक्तानामसत्वादितिभावः ज्ञानत्वेनाभिन्नत्वे

मिष्यत इति तथा च सर्वकार्याणां देशाभेदरूपं देशाद्वैतेनानिष्टमिति भावः एतन्मते कार्यकारणभावाभ्युपगमासंभवं विवृणोति तन्नयइति परेण परस्यावेदनादिति अवेदनात् अविषयीकरणात् परेण परग्रहेण अन्ययोर्ग्राह्यग्राहकत्वेदस्य तज्जिज्ञासितस्य भंगप्रसंगादिति भावः कार्यकारणभिमतज्ञानद्वयाग्रहणे विभिन्नयोः कार्यकारणयोरेकेनज्ञानेन ग्रहणैकस्योभयात्मकत्वप्रसंगेन ग्राह्यग्राहकभेदानुपपत्तेः अनेनैवापर्यवसितकार्यकारणभावानुपपत्त्या कार्यकारणयोर्भेदस्यावश्यकत्वादिति भावः कार्यकारणभावसिद्धेरिति कार्यकारणभावस्य कार्यकारणद्वयघटितत्वेन प्रत्येकविषयकज्ञानेन ग्रहासंभवेन साधकज्ञानाभावादिति भावः ज्ञानानां ज्ञानत्वेन कजातीयत्वेपि क्रमिकक्षणिकज्ञानव्यक्तीनां भेदस्यावश्यकतया सर्वकार्याणां देशाभेदरूपस्य कार्यासमानकालीनज्ञानरूपदेशानां कार्यत्वासंभवेन सर्वदेशानां सर्वकार्यत्वरूपस्य च देशाद्वैतस्य च योगाचारमते निष्टत्वादस्वरसआकुरित्यनेन सूचितः नन्वित्यादिना भिन्नदेशनिष्ठभिन्नकार्यजनकानामेकैककारणानां भेदेऽनवस्थापत्तिराशंकिता तन्न संगच्छते एकैकदेशे कार्यजनकैकैकव्यक्तेरेवदेशांत

रेकार्यासामर्थ्येन भेदस्यापादितत्वात् तत्रैतद्दिष्टापत्त्याशंकाया अयोगादित्यत आपादयितुराशयमनुभ्यमानस्य भिन्नदेशेकार्यद्वयजनकैककारणस्य भेदापादनमित्याशयभ्रमेणयमाशंकेत्याह भिन्नेति आशयं प्रकाशयतीति भ्रमं भिप्रेताभ्यापत्तिं स्पष्टतीत्यर्थः मूलेतेषामपीति एकैकत्वेनाभिमतो योयस्तेषामपीत्यर्थः दोषाएवकश्चिदनयोरितिव्याचष्टे विचारो देशगतेतिसभुनः कस्मिंश्चित्यत्रसइत्यस्य व्याख्या दोषइति उक्तप्रसंगविपर्ययो न्यादेशभेदावच्छिन्नस्यासामर्थ्यस्यैव समर्थ्यसाधनीयतयासामर्थ्यादेरसाध्यत्वेन कस्मिन्साध्यइति दुर्वि किं सामर्थ्यासामर्थ्ययोरित्यादिना असाध्यवितर्को संगतः साध्यपदं व्याचष्टे विषयेइति विपरिणतेन विपरिणतवचनेन सा... यथाश्रुतार्थकत्वमुपपादयतां मतमाह केचित्तिविरुद्धेति सामर्थ्यासामर्थ्यरूपेत्यादिः भेदापत्तीति कार्य... कारित्यादिः कश्चिद्दादीस्तेषां उपपादनाय कारिणोपि सामर्थ्येनोपयात्तदपि सामर्थ्यमपि साध्यमिति कारिणपसइत्यादिः सामर्थ्यमपि कारित्वेन हेतुना साध्यं वस्यति सामर्थ्यसाधिकासामर्थ्यं विना करणानुपपत्तिं अतएवतत्तच्छक्तिपदमसामर्थ्यपरतयाव्याचष्टे अशक्तावसामर्थ्ये

बोद्ध०
७५

इतिसाध्यपदार्थविसर्केउपात्तस्यविरुद्धधर्माभासहेतुकस्यभेदस्यसाक्षादुक्तप्रसंगादिसाध्यताविरहात्तस्यापिसिस्य
विरुद्धधर्माभ्यासहेतुकस्यभेदस्यसाक्षादुक्तप्रसंगादिसाध्यताविरहात्तस्यापिपरंपरयातत्साध्यत्वेनोपादानंसंगमयति
भेदोपिचेतिपरंपरयाउक्तप्रसंगादिसाध्यासामर्थ्यरूपसामर्थ्यविर[illegible]कुर्वीणसमर्थकारिभेदसाधकस्यसाधनेन
साध्यस्यतयावितर्कितस्यविरोधस्यपरंपरयाप्युक्तप्रसंगादिसाध्य[illegible]रहितप्रमाणांतरसाध्यतयावितर्क्यत्वंसंगम
यति विरोधस्त्वितिप्रमाणांतरं असामर्थ्यं सामर्थ्यविरोधितदभावत्वात् यस्यदेभावः सतद्विरोधीतिव्याप्यस्वभावंकरणा
करणप्रयोजकसामर्थ्यासामर्थ्यविरोधस्यप्रकृतत्वात् शक्यशक्तयोरितिसामर्थ्यासामर्थ्यपरतयाव्याचष्टेसामर्थ्यासाम
र्थ्ययोरितिव्याचष्टेसामर्थ्यासामर्थ्यविरोधस्यप्रकृतत्वादग्रेतद्देशकारित्वदन्यदेशाकारित्वयोरविरोधशंकायास्तद्देशाक
रणतदन्यदेशाकरणयोरविरोधेपपादनस्यचासंगतेरग्रेतनंकारित्वाकारित्वेकरणाकरणेचसामर्थ्यासामर्थ्यरूपइत्या
ह अग्रेचेतिभिन्नकालशक्यशक्तयोरपीत्यिचापितत्तदद्वयंतदुभयपरतयाव्याचष्टे एवमिति इत्यपिसामर्थ्यपरमितिविप

७५

७१
रिक्तमनुषज्यते कारित्वाकारित्वादिपदानांयथाश्रुतार्थकत्वाद्विरोधेनकल्पांतरमाह यद्वेतिप्राक्प्राक्तनं एतदितित्व
स्यविशेषणंउपलक्षणंअजस्वार्थलक्षणयापरिग्राहकंतत्रचनकश्चिदित्यस्यएकदेशेकारिबीजनिष्ठसामर्थ्यविरोधेना
सामर्थ्यस्यतादृशभेदसाधकस्यान्यदेशेकारिबीजप्रसंगविपर्ययाभ्यांसाधनेविरुद्धाभ्यांकरणाकरणाभ्यांतादृशबीजयो
भेदसाधनेवाभेदकश्चिद्दोषोयदीत्यर्थः परपक्षेदेशादेतत्कारणभेदाद्यतीव्याचष्टे तत्रचेतिकरणाकरणाभ्यांविरोधेनस्यनि
र्दोषत्वेइत्यर्थः सर्वदेशकारित्वसर्वदेशाकारित्वयोरेकतरस्वीकारेणकारित्वाकारित्वयोर्विरोधेपिकारणभेदप्रसंगवि
रहात्तदुभयपक्षेप्रसंजनीयंविभिन्नविधमद्वैतमाह एकत्रकारि[illegible]नासर्वकार्येशून्यत्वरूपमद्वैतमित्यतेन अ
द्वैतमित्युभयस्यापद्येतेत्यग्रिमेणान्वयः एकत्वेनोभयसिद्ध्यक्तेर्द[illegible]रणाकरणोपगमेकारणभेदप्रसंजनंसंग
मयति क्वचिदिति देशइतिशेषः कारणेतिएककारणाव्यक्तेरपिभेदस्या[illegible]त्यर्थः अनयोरित्यपिकरणाकरणे अंतर्भाव्य
व्याचष्टे अनयोरितीतिएवंसति करणाकरणविरोधस्यापिप्रकृततयाअग्रिमकारित्वाकारित्वकारणाकरणपदानांय

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

था श्रुतार्थकत्वोपपादनायशाक्यशक्तोरित्यस्यसामर्थ्यासामर्थ्यपरत्वमुपेक्ष्यकरणाकरणपरतामेवाहशक्यशक्तोरितितथा
चेतितृतीयपक्षस्यकरणाकरणविरोधरूपत्वेत्यर्थः अग्रिमग्रंथः विरो[illegible]पत्वतृतीयपक्षेसंभवरूपदोषाशंकनपरःसचे
हनास्तीत्यादिग्रंथः सर्वदेशोकरणसामर्थ्येपिस्वभावतः क्वचिदेवदे[illegible]द्यदेशेसमर्थंतत्तत्तत्करोतीतिव्याप्तेरप्र
योजकत्वादित्याशंकते मूलेसर्वदेशेतिसमानस्वभावत्वंसमानसाम[illegible]बीजादेःकारणस्यस्वोपादानेतिस्वपदस्यमु
ख्यविशेष्यभूतकारणपरत्वंनसंगच्छते कारणस्यस्वाधिकरणजननस्वभावत्वात् अतोविवृत्तौस्वंकार्यमितितन्मतेकार्य
स्योपादानदेशोमुख्यत्वेरसंभवस्यवक्ष्यमाणत्वादाह प्रतिनियतदेशेतियत्रदेशेकार्यजननमुभयवादिसिद्धंतद्देशोइत्यर्थः
सदेशोन्यायमतेकारणबीजादिसंबंधदेशोएवपरमतेचनदेशत्वेनाभिमतस्तद्देशोपादेयस्तद्देशोत्वाधिकरणक्षणोत्त
रोत्पन्नोन्यदेशः नतुकारणबीजाद्यधिकरणदेशः एतद्देशपपादयतिक्षणिकत्वेनेतिकारणस्येतितादात्म्येनोपादानंस
बलितस्यइत्यर्थः कार्याधिकरणत्वायोगादितिसमानकालीनयोरेवाधाराधेयभावादितिभावः भेदेनिर्मितत्वस्यप्रयोज

ESHAUDAUL MEMORIAL